Digitized by Arya Samaj Foundation Chennai and eGangotri

।। श्रीगणेश शारदा गुरुभ्यो नमः।।
।। श्री वेदव्यासाय नमः ।।

।। एकाग्निकाण्डः।।

(मन्त्रप्रश्नः)

(काण्डव्रत होम मन्त्राश्च)

For copies of this book please contact:
Shri S. Parameswara Sharma
14/52, Manjula.
Pestom Sagar Rd.No. 2,
Chembur - Mumbai-89
Tel: 524 2155

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। श्रीगणेश शारदा गुरुभ्यो नमः।।

।। श्री वेदव्यासाय नमः ।।

।। एकाग्निकाण्डः।।

(मन्त्रप्रश्नः)

(काण्डव्रत होम मन्त्राश्च)

For Private Circulation Only

For copies of this book please contact:
Shri S. Parameswara Sharma
14/52, Manjula.
Pestom Sagar Rd.No. 2,
Chembur - Mumbai-89
Tel: 524 2155

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ श्री शृङ्गेरी श्रीजगद्गुरुमहासंस्थानम् ॥

मुद्रा

श्रीमत्परमहंसपरिव्राचकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण यमनियमासनप्राणायाम प्रत्याहार धारणाध्यानसमाध्यष्टाङ्गयोगानिष्ठाननिष्ठ तपश्चक्रवर्त्यनाद्यविच्छिन्न श्रीशङ्कराचार्यगुरुपरम्पराप्राप्त षड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्ग प्रवर्तक सर्वतन्त्र-स्वतन्त्रादिराजधानी विद्यानगर महाराजधानी कर्णाटकसिंहासन प्रतिष्ठापनाचार्य श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋष्यशृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि श्रीमद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्रीमदभिनवविद्यातीर्थस्वामि गुरुकरकमलसञ्जात

॥ श्रीजगद्गुरु शृङ्गेरी श्रीमद्भारतीतीर्थस्वामिभिः ॥

अस्मदत्यन्तप्रियशिष्य श्रीपरमेश्वरशर्म विषये नारायणस्मरणपुरस्सर विरचिता आशिषस्समुल्लसन्तु।

भवन्तः वेदमधीत्य शिष्यानध्यापयन्तः अधुना लोकानामुपकाराय अत्यावश्यक वेदभागान् स्थूलाक्षरैः सस्वरं प्रकाशयन्तीति विदित्वा भृशं मोदामहे। अत्र हि रुद्रक्रमः महान्यासः उदकशान्तिरित्यादयः प्रकाशिता ये सर्वेषामत्यन्तमावश्यकाः। भवदीयोऽयमुद्यमः धर्मश्रद्धालूनामास्तिकानां प्रशंसापात्रमिति तु निश्चप्रचम्।

श्री शारदाचन्द्रमौळीश्वरयोरसीमया कृपया इमे ग्रन्थाः आस्तिकजन पाणिपल्लवान्यलंकुर्वन्तु भवन्तश्च श्रेयःपरम्पराभिस्समेधन्तामित्याशास्महे॥

इति नारायणस्मरणम्

शृङ्गगिरिः
प्रमाथिश्रावणकृष्णाष्टमी भार्गववासरः
३-९-१९९९

मुद्रा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

SRI GURUBHYO NAMAHA



MUTUAL TRUST — FRIENDSHIP -- TOLERANCE--OUR TRADITION

Sri Sankara Jayanthi Celebration Committee

6, Savitha, 70,Pestomsagar, 2nd Road, Tilaknagar P.O., BOMBAY - 89.
Tel. Nos. : 5241864

Date

FOREWORD

Shri Parameswara Sharma has been conducting Veda Classes in Pestom Sagar Chembur, for over two decades, and has trained over a hundred vidyarthis comprising of a wide range of asthikas covering school children, college boys, office-goers and retired elders. He has been associated with our Shri Sankara Jayanthi Celebration Committee for the past 16 years conducting Rudra-japa-abhisheka-puja along with his disciples.

Shri Parameswara Sharma's teaching skill and the recitation of vedic hymns by his disciples have been appreciated by many eminent vedic scholars and patrons of Religious & Cultural Organisations.

A momentous occasion was in June 1994, when, pleased with the excellent Ghana recitation by a few of Parameswara Sharma's young disciples,and in appreciation of his glorious spiritual service,HisHoliness Shri Bharathi Theertha Swamigal, Sringeri Mutt blessed and honoured him with a *'Ponnadai'*

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Besides conducting veda classes, Shri Parameswara Sharma devotes his available time in compiling Vedic Literature into convenient books, in bold print, very useful to vidyarthis and religious practioners. He has compiled the following books :-

RUDRAM -CHAMAKAM
RUDRA KRAMAM
CHAMAKA KRAMAM
MAHANYASAM
UDAKA SHANTHI
ACHIDRAM
ASWAMEDHAM (1)

Copies of books compiled by Parameswara Sharma were presented to HIS HOLINESS SHRI BHARATHI THEERTHA SWAMIGAL, for His approval & blessings. His Holiness has gone through the books and has expressed His happiness and said that the books are very good and would be useful to the students

Appreciating his effort & dedication, His Holiness has blessed Shri Parameswara Sharma with a *SHREEMUKHAM.*

I, on behalf of the Sri Sankara Jayanthi Celebration Committee, pray to Almighty to bestow upon Shri Parameswara Sharma, a healthy, blissful and long life to continue his noble social service of propagating Vedas and Vedic Culture among the youth and active citizens.

V. Venkitachalam
Secretary
Sri Sankara Jayanthi Celebration Committee

13th September 1999.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्डव्रत होम मन्त्राः ।।

(विषयानुक्रमणिका)

क्रमः	मन्त्रः	पुटम्
१.	प्रजापते न त्वत्	1
२.	सोमो धेनुम्	3
३.	अग्ने नय	5
४.	आनो विश्वे	7
५.	अग्ने व्रतपते..	10
६.	पृथिवी समित्	10
७.	अन्तरिक्षं समित्	11
८.	द्यौस्समित्	11
९.	प्राजापत्या मे	12
१०.	वयस्सुपर्णाः	12
११.	व्रतोत्सर्जनम्	13
१२.	युञ्जते मनः..	14
१३.	सविता भूत्वा..	18

*****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

(विषयानुक्रमणिका)

खण्डः	मन्त्रः	पुटम्
१.	प्रसुग्मन्ता धियसानस्य	1.001
२.	हिरण्यवर्णाश्शुचयः	1.004
३.	सोमः प्रथमो विविदे	1.006
४.	सोमाय जनिविदे	1.009
५.	आतिष्ठेममश्मानम्	1.012
६.	सत्येनोत्तभिता भूमिः	1.016
७.	तामन्दसानामनुषो दुरोण	1.019
८.	शर्म वर्मेदं	1.023
९.	इह गावः	1.026
१०.	उदीर्ष्वातः	1.029
११.	अपश्यन्त्वा	1.032
१२.	आरोहोरुम्	1.034
१३.	विष्णुर्योनिम्	1.035

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

(विषयानुक्रमणिका)

खण्डः	मन्त्रः	पुटम्
१४.	करोमि ते	1.038
१५.	प्रातरग्निं	1.040
१६.	इमाङ्खनामि	1.042
१७.	उदसौ सूर्यः	1.044
१८.	अक्षीभ्यान्ते	1.045

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

(विषयानुक्रमणिका)

खण्डः	खण्डारंभः	पुटम्
१.	उष्णेन वायवुदकेन	2.051
२.	आयुर्दा देवजरसम्	2.053
३.	आगन्त्रा समगन्महि	2.056
४.	योगेयोगे तवस्तरम्	2.060
५.	सुश्रवस्सुश्रवसम्	2.062
६.	परित्वाऽग्ने	2.065
७.	इमग्ग् स्तोमम्	2.068
८.	आयुष्यं वर्चस्यम्	2.071
९.	मयि पर्वत पूरुषम्	2.074
१०.	त्रय्यै विद्यायै	2.077
११.	धाता ददातु	2.079
१२.	दिवस्परीत्येषः।	2.084
१३.	माते कुमारम्	2.090

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

(विषयानुक्रमणिका)

खण्डः	खण्डारंभः	पुटम्
१४.	नक्तञ्चारिणः	2.093
१५.	यद्भूमेः	2.096
१६.	कूर्कुरस्सुकूर्कुरः	2.101
१७.	इन्द्र जहि	2.105
१८.	परमेष्ठ्यसि	2.113
१९.	यन्मे माता	2.118
२०.	पृथिवी ते पात्रम्	2.122
२१.	उक्थ्यश्चास्यतिरात्रश्च	2.127
२२.	या त एषा रराट्या तनूः	2.132

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

(पाठभेदाः)

पुटम्	पङ्क्तिः	पाठभेदः
1.001	5	'समर्यमा संभगो'
1.008	10	'सा त्वमस्यमूहममूह'
1.009	3	'वेत्तव एहि'
1.010	4	'कृणु'
1.015	3	'सत्यमित्वमया'
1.015	4	'धृतोऽयसा'
1.017	3	'श्वश्र्वां भव'
1.019	10	'विहतं पुनः'
1.022	6	'वसून्यश्विना'
1.025	3	'वियौष्ठं'
1.028	4	'दश'

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

(पाठभेदाः)

पुटम्	पङ्क्तिः	पाठभेदः
1.029	4	'पतिवति'
1.032	4	'तनूॐऋत्विये' / 'तनूमृत्विये'
1.033	3	'शन्न एधि द्विपदे'
	6	'प्रहरेम शेफम्'
1.034	10	'अवरीषु'
1.036	5	'एवन्तं'
	7	'गर्भ एव'
1.037	1	'सुपुत्रः'
1.038	4	'नारितं'
1.039	1	'शकुनै र्यदशाकुनम्'
1.043	1	'उत्तरेदुत्तराभ्यः'
1.044	3	'मूर्द्धाऽहमुग्रो विवाचनम्'
	8	'ममेदनु'
	9	'अहन्तदक्रिरेवा सपत्ना'

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

(पाठभेदाः)

पुटम्	पङ्क्तिः	पाठभेदः
1.044	8	'भूवरीः'
1.046	6	'भासंसाद्ध्वꣳससो'
1.047	3	'तनूर्भवति रुशती'
	4	'वाससा स्वमङ्ग'

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

(पाठभेदाः)

पुटम्	पङ्क्तिः	पाठभेदः
2.052	8	'शुन्धि शिरो'
2.053	10	'श्चाकृतꣳस्त्वा'
	11	'ग्न आवृञ्जन्'
2.055	4	'चाय्यो'
	8	'परस्वी'
2.056	1	'स्थविरꣳ'
2.057	4	'दꣳशस्ते'
	7	'राचार्यस्तव'
2.059	1	'तङ्गोपाय समा'
2.061	3	'अफ्सरासु च या मेधा'
2.062	3	'सुश्रवस्सुश्रवो देवानां'
2.065	4	'सुब्रह्मा ब्रह्मचारिभिः'
2.069	5	'मुपगूहाम्यु'
2.070	8	'इयमोषधि'
	9	'ब्रह्मवर्चसिं'

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

(पाठभेदाः)

पुटम्	पङ्क्तिः	पाठभेदः
2.071	8	'जैत्र्यायाविशतां मां'
	11	'सर्वा स्समृद्धिर् ऋद्धयो'
2.073	6	'कामयान्यै'
2.074	3	'मुपतिष्ठतु'
2.078	2	'अनष्ट'
	5	'चितिरस्यपचितिं'
2.079	1	'सुभूतम्।' इत्यधिक पाठः।
2.083	5 & 7	'अक्षितो'
2.087	11	'आत्मा वै पुत्र'
2.091	11	'पर्याद्ध्ँ स्वाहा'
2.094	4	'वेदो वै पुत्र'
2.102	5	'ताँस्त्वँस्पाशयित्वाऽऽगच्छत्तन्त्वा'
	7	'इत्यब्रवीत्'
2.103	10	'समश्वा वृषाणः'
2.106	4	'पशून्कर्तेन'

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

(पाठभेदाः)

पुटम्	पङ्क्तिः	पाठभेदः
2.106	8	'पौर्णमास्याञ्च विषबलि॰'
2.108	4	'तक्षक वैशालेयस्ते'
2.114	2	'वाताजिरैरायाहि मम'
2.116	7	'समश्नन्त'
	9	'देवसेना'
2.117	4	'निषङ्गिन्नुपस्पृश'
2.118	5	'वृङ्क्तां माभु'
	8	'परितस्थुषीः'
2.119	8	'ऋतुभिरहोरात्रैस्स सन्धिभिः'
2.120	2	'मदन्ति स्वाहा'
2.122	10	'मार्जयन्तां पितरो'
2.124	2	'स्तृप्यत तृप्यत तृप्यत'
2.125	1	'यत्रैनान् वेत्थ'
	3	'सत्या एता आशिषस्सन्तु'

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

(पाठभेदाः)

पुटम्	पङ्क्तिः	पाठभेदः
2.132	4	'रराटमुदिव'
	10	'यदहन्धनेन प्रवणꣳ'
	10	'धनेन देवा'
2.133	4	'परि सर्वेभ्यो ज्ञातिभ्यः'
2.134	3	'देववत्तरम्'
	4	'सिक्त्वापो'
	7	'त्फलमभ्यपप्तत्तदु वायुरेव'
2.135	3	'अभ्यपप्तच्छिवेन'
	3	'मनसाऽहमागाम्'

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओं श्रीगणेश शारदा गुरुभ्यो नमः।।
श्री वेदव्यासाय नमः।।

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

हरिः ओ(४)म्।।

१ प्रजापतये काण्ड ऋषये स्वाहा।।

प्रजापते नत्वदेतान्यन्यः। विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु। वयꣳ स्याम पतयो रयीणाम्।। १।।

रयीणां पतिꣳयजतं बृहन्तम्। अस्मिन्भरे नृतम- व्वाजसा तौ। प्रजापतिं प्रथमजा- मृतस्य। यजाम देवमधिनो ब्रवीतु।। २।।

प्रजापते त्वन्निधिपाः पुराणः। देवानां

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

पिता जनिता प्रजानाम्। पति र्विश्वस्य जगतः परस्पाः। हविर्नो देव विहवे जुषस्व।। ३।।

तवेमे लोकाः प्रदिशो दिशश्च। परावतो निवत उद्वतश्च। प्रजापते विश्वसृज्जीवधन्य इदन्नो देव। प्रतिहर्य हव्यम्।। ४।।

प्रजापतिं प्रथम- य्यज्ञियानाम्। देवानामग्रे यजत- य्यजद्ध्वम्। सनो ददातु द्रविणꣳ सुवीर्यम्। रायस्पोष-व्विँष्यतु नाभिमस्मे।।५।

यो रायईशे शतदाय उक्थ्यः। यः पशूनाꣳ रक्षिता विष्ठितानाम्। प्रजापतिः प्रथमजा ऋतस्य। सहस्रधामा जुषताꣳ हविर्नः।। ६।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

२ सोमाय काण्ड ऋषये स्वाहा।।

सोमो धेनुꣳ सोमो अर्वन्तमाशुम्। सोमो वीरङ्कर्मण्य-न्ददातु। सादन्य- विँदत्थ्यꣳ सभेयम्। पितुश्श्रवणं यो ददाशदस्मै।। १।।

अषाढयुथ्सु पृतनासु पप्रिम्। सुवर्षा-मप्स्वां वृजनस्य गोपाम्। भरेषुजाꣳसुक्षितिꣳ सुश्रवसम्। जयन्तन्त्वामनुमदेम सोम।।२।।

त्वꣳसोम क्रतुभि स्सुक्रतुर्भूः। त्वन्दक्षै स्सुदक्षो विश्ववेदाः। त्वं वृषा वृषत्वेभि-र्महित्वा। द्युम्नेभि र्द्युम्न्यभवो नृचक्षाः।।३।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

या ते धामानि हविषा यजन्ति। ता ते विश्वा परिभूरस्तु यज्ञम्। गयस्फानः प्रतरणस्सुवीरः। अवीरहा प्रचरा सोमदुर्यान्।। ४।।

त्वमिमा ओषधी स्सोम विश्वाः। त्वमपो अजनयस्त्वङ्गाः। त्वमाततन्थोर्वन्तरिक्षम्। त्वञ्ज्योतिषा वितमो ववर्त्थ।। ५।।

या ते धामानि दिवि या पृथिव्याम्। या पर्वतेष्वोषधीष्वप्सु। तेभिर्नो विश्वै स्सुमना अहेडन्। राजन्थ्सोम प्रति हव्या गृभाय।। ६।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

३ अग्नये काण्ड ऋषये स्वाहा।।

अग्ने नय सुपथा राये अस्मान्। विश्वानि देववयुनानि विद्वान्। युयोद्ध्यस्म- ज्जुहुराण- मेनः। भूयिष्ठान्ते नमउक्तिंविधेम।। १।।

प्रवश्शुक्राय भानवे भरद्ध्वम्। हव्यं मति- ञ्चाग्नये सुपूतम्। यो दैव्यानि मानुषा जनूꣳषि। अन्तर्विश्वानि विद्मनाजिगाति।।२।।

अच्छागिरो मतयो देवयन्तीः। अग्नि- ꣳयन्ति द्रविणं भिक्षमाणाः। सुसन्दृशꣳ सुप्रतीकꣳ स्वञ्चम्। हव्यवाहमरतिं मानुषाणाम्।। ३।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

अग्ने त्वमस्मद्युयोद्ध्यमीवाः। अनग्निन्त्रा अभ्यमन्तकृष्टीः। पुनरस्मभ्यꣳसुविताय देव। क्षाव्विँश्वेभिरजरेभि र्यजत्र।। ४।।

अग्ने त्वं पारया नव्यो अस्मान्। स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी। भवा तोकाय तनयाय शꣳयोः।।५।।

प्रकारवो मनना वच्यमानाः। देवद्रीचीन्नयथ देवयन्तः। दक्षिणावाड्वाजिनी प्राच्येति। हविर्भरन्त्यग्नये घृताची।। ६।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

४ विश्वेभ्यो देवेभ्यः काण्ड

ऋषिभ्य स्स्वाहा।।

आनो विश्वे अस्क्रागमन्तु देवाः। मित्रो अर्यमा वरुणस्सजोषाः। भुवन् यथानो विश्वे वृधासः। करन्थ्सुषाहा विथुरन्नशवः।। १।।

शन्नो देवा विश्वदेवा भवन्तु। शꣳसरस्वती सह धीभिरस्तु। शमभिषाचश्शमुरातिषाचः। शन्नो दिव्याः पार्थिवा श्शन्नो अप्याः।२।।

ये सवितु स्सत्यसवस्य विश्वे। मित्रस्य व्रते वरुणस्य देवाः। ते सौभग- व्वीरवद्-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

गोमदप्नः। दधातन द्रविणञ्चित्रमस्मे।।३।।

अग्ने याहि दूत्यँ्वारिषेण्यः। देवाँ अच्छा ब्रह्मकृता गणेन। सरस्वतीं मरुतो अश्विनाऽपः। यक्षि देवान्रत्नधेयाय विश्वान्।।

द्यौः पितः पृथिवि मातरद्ध्रुक्। अग्नेर्भ्रात र्वसवो मृडतानः। विश्व आदित्या अदिते सजोषाः। अस्मभ्यँ शर्म बहुल व्विँयन्त।। ५।।

विश्वेदेवा श्शृणुतेमँ हवं मे। ये अन्तरिक्षे य उपद्यविष्ठ। ये अग्निजिह्वा उत वा यजत्राः। आसद्यास्मिन्- बर्हिषि

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

मादयद्ध्वम्।। ६।।

साँहितीभ्यो देवताभ्य उपनिषद्भ्य-
स्स्वाहा।।

याज्ञिकीभ्यो देवताभ्य ००० स्वाहा।।

वारुणीभ्यो देवताभ्य ०००० स्वाहा।।

ब्रह्मणे स्वयंभुवे स्वाहा।।

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य
काम्यम्। सनिं मेधामयासिषम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

अग्ने/ (वायो)/ (आदित्य)/ (व्रतानां)

व्रतपते काण्डऋषिभ्यः प्राजापत्यं

व्रतञ्चरिष्यामि तच्छकेयन्तन्मे राद्ध्यताम्।।

******

पृथिवी समित्। तामग्नि- स्समिन्धे।

साऽग्निꣳ समिन्धे। तामहꣳ समिन्धे। सा मा

समिद्धा। आयुषा तेजसा। वर्चसा श्रिया।

यशसा ब्रह्मवर्चसेन। अन्नाद्येन समिन्ताꣳ

स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

अन्तरिक्षꣳ समित्। ताव्वायु-स्समिन्धे। सा वायुꣳ समिन्धे। तामहꣳ समिन्धे। सा मा समिद्धा। आयुषा तेजसा। वर्चसा श्रिया। यशसा ब्रह्मवर्चसेन। अन्नाद्येन समिन्ताꣳ स्वाहा।।

द्यौस्समित्। तामादित्य- स्समिन्धे। सा ऽऽदित्यꣳ समिन्धे। तामहꣳ समिन्धे। सा मा समिद्धा। आयुषा तेजसा। वर्चसा श्रिया। यशसा ब्रह्मवर्चसेन। अन्नाद्येन समिन्ताꣳ स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

प्राजापत्या मे समिदसि सपत्नक्षयणी। भ्रातृव्यहा मेऽसि स्वाहा।।

अग्ने/(वायो)/(आदित्य/व्रतानां)व्रतपते काण्ड ऋषिभ्यः (सौम्यं/आग्नेयं/वैश्वदेवं) व्रतं चरिष्यामि तच्छकेय- न्तन्मे राद्ध्यताम्।।

वयस्सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः। अपद्ध्वान्तमूर्णुहि पूर्द्धिचक्षु र्मुमुग्ध्यस्मान्निधयेव बद्धान्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

(व्रतोत्सर्जने)

अग्ने/ (वायो)/ (आदित्य)/ (व्रतानां)

व्रतपते काण्डऋषिभ्यः

(प्राजापत्यं)/(सौम्यं)/ (आग्नेयं)/ (वैश्वदेवं)

व्रत - मचारिषं तदशक-न्तन्मे राधि।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

युञ्जते मन इत्यनुवाकः।।

युञ्जते मन उत युञ्जते धियः। विप्रा विप्रस्य बृहतो विपश्चितः। विहोत्रा दधे वयुना विदेक इत्। मही देवस्य सवितुः परिष्टुतिः।।

देवस्य त्वा सवितुः प्रसवे। अश्विनो र्बाहुभ्याम्। पूष्णो हस्ताभ्यामाददे।।

अभ्रिरसि नारिरसि। अद्ध्वरकृद्देवेभ्यः। उत्तिष्ठ ब्रह्मणस्पते।

देवयन्तस्त्वेमहे। उपप्रयन्तु मरुतस्सुदानवः। इन्द्रप्राशूर्भवा सचा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

प्रैतु ब्रह्मणस्पतिः। प्रदेव्येतु सूनृता।
अच्छावीरन्नर्यं पङ्क्तिराधसम्। देवा
यज्ञन्नयन्तु नः।।

देवी द्यावापृथिवी अनु मे मꣳ साथाम्।।
ऋद्ध्यासमद्य। मखस्य शिरः।[२]। मखाय
त्वा। मखस्य त्वा शीर्ष्णे।।

इयत्यग्र आसीः। ऋद्ध्यासमद्य। मखस्य
शिरः। मखाय त्वा। मखस्य त्वा शीर्ष्णे।।

देवीर्वम्रीरस्य भूतस्य प्रथमजा ऋतावरीः।
ऋद्ध्यासमद्य। मखस्य शिरः।[३]। मखाय
त्वा। मखस्य त्वा शीर्ष्णे।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

इन्द्रस्यौजोऽसि। ऋद्ध्यासमद्य। मखस्य शिरः। मखाय त्वा। मखस्य त्वा शीर्ष्णे।।

अग्निजा असि प्रजापते रेतः। ऋद्ध्यासमद्य। मखस्य शिरः।[४]। मखाय त्वा। मखस्य त्वा शीर्ष्णे।।

आयुर्द्धेहि प्राणन्धेहि। अपानन्धेहि व्यानन्धेहि। चक्षुर्द्धेहि श्रोत्रन्धेहि। मनो धेहि वाचन्धेहि। आत्मानन्धेहि प्रतिष्ठान्धेहि। मान्धेहि मयि धेहि।।

मधुत्वा मधुला करोतु। मखस्य शिरोऽसि। [५]। यज्ञस्य पदे स्थः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

गा॒य॒त्रेण॑ त्वा॒ छन्द॑सा करोमि। त्रैष्टु॑भेन त्वा॒ छन्द॑सा करोमि। जाग॑तेन त्वा॒ छन्द॑सा करोमि।।

म॒खस्य॒ रास्ना॑ऽसि। अदि॑तिस्ते॒ बिल॑ङ्-गृह्णातु। पाङ्क्तेन॒ छन्द॑सा। सूर्य॑स्य॒ हर॑साश्राय। म॒खो॑ऽसि।। [६]।।

(प॒ते॒ शिर॑ ऋ॒तावरीर् ऋ॒द्ध्यासम॒द्य म॒खस्य॒ शिर॒ शिर॒ शिरो॑ऽसि॒ नव॑ च)।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सविता भूत्वा इत्यनुवाकः।।

सविता भूत्वा प्रथमेऽहन् प्रवृज्यते। तेन काम ँ एति।।

यद्द्वितीयेऽहन् प्रवृज्यते। अग्नि र्भूत्वा देवानेति।।

यत्तृतीयेऽहन् प्रवृज्यते। वायु र्भूत्वा प्राणानेति।।

यच्चतुर्थेऽहन्प्रवृज्यते। आदित्यो भूत्वा रश्मीनेति।।

यत्पञ्चमेऽहन् प्रवृज्यते। चन्द्रमा भूत्वा नक्षत्राण्येति।। [१]।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

यथ्षष्ठेऽहन् प्रवृज्यते। ऋतु र्भूत्वा सव्वँथ्सरमेति।।

यथ्सप्तमेऽहन् प्रवृज्यते। धाता भूत्वा शक्वरीमेति।।

यदष्टमेऽहन् प्रवृज्यते। बृहस्पति र्भूत्वा गायत्रीमेति।।

यन्नवमेऽहन् प्रवृज्यते। मित्रो भूत्वा त्रिवृत इमाल्लँलोकानेति।।

यद्दशमेऽहन् प्रवृज्यते। वरुणो भूत्वा विराजमेति।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। प्राजापत्यादि काण्ड व्रत होम मन्त्राः।।

यदेकादशेऽहन् प्रवृज्यते। इन्द्रो भूत्वा त्रिष्टुभमेति।।

यद्द्वादशेऽहन् प्रवृज्यते। सोमो भूत्वा सुत्यामेति।।

यत्पुरस्तादुपसदां प्रवृज्यते। तस्मादितः पराङ्मूल्लोकाꣳस्तपन्नेति।।

यदुपरिष्टादुपसदां प्रवृज्यते। तस्मादमुतोऽर्वाङ्मालोकाꣳस्तपन्नेति।।

य एवꣳवेद। ऐवतपति।। [३]।।

(नक्षत्राण्येति विराजमेति तपति)।।

हरिः ओ(३)म्।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओं श्रीगणेश शारदा गुरुभ्यो नमः।

श्री वेदव्यासाय नमः।

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

हरिः ओ(४)म्

१ प्रसुग्मन्ता धियसानस्य सक्षणि वरेभिर्वरा ँ अभिषुप्रसीदत। अस्माकमिन्द्र उभयं जुजोषति यथ्सौम्यस्यान्धसो बुबोधति।

अनृक्षरा ऋजवस्सन्तु पन्था येभिस्सखायो यन्ति नो वरेयम्। *समर्यमा संभगो नो निनीयाथ्सञ्जास्पत्य ँ सुयममस्तु देवाः।।

अभ्रातृघ्नीं वरुणापतिघ्नीं बृहस्पते। इन्द्रापुत्रघ्नीं लक्ष्म्यन्तामस्यै सवितस्सुव।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

अघोरचक्षुरपतिघ्न्येधि शिवा पतिभ्य-स्सुमना-स्सुवर्चाः। जीवसू र्देवकामा स्योना शन्नो भव द्विपदे शञ्चतुष्पदे।।

इदमहयँ्यात्वयि पतिघ्न्यलक्ष्मि- स्तान्नि-र्दिशामि। जीवाꣳ रुदन्ति विमयन्ते अद्ध्वरे दीर्घामनु प्रसिति-न्दीधियुर्नरः। वामं पितृभ्यो य इदꣳ समेरिरे मयः पतिभ्यो जनयः परिष्वजे।।

व्युक्षत्क्रूरमुदचन्त्वाप आऽस्यै ब्राह्मणा-स्स्नपनꣳहरन्तु। अवीरघ्नीरुदचन्त्वापः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

अर्यम्णो अग्निं परियन्तु क्षिप्रं प्रतीक्षन्ताᳬ श्वश्र्वो देवराश्च।

खेऽनसः खेरथः खेयुगस्य शचीपते। अपालामिन्द्र त्रिःपूत्व्यकर-थ्सूर्यवर्चसम्।।

शन्ते हिरण्यᳬ शमुसन्त्वाप-श्शन्ते मेधी भवतु शय्युगस्य तृद्म। शन्त आप-श्शतपवित्रा भवन्त्वथा पत्या तन्वᳬ सᳬसृजस्व॥ (दीधियु र्नरोऽष्टौ च)।।

इति प्रथमः प्रश्ने प्रथमः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२ हिरण्यवर्णा श्शुचयः पावकाः प्रचक्रमु-र्हित्वाऽवद्यमापः। शतं पवित्रा वितता ह्यासु ताभिष्ट्वा देवस्सविता पुनातु।।

हिरण्यवर्णा श्शुचयः पावका यासु जातः कश्यपो यास्वग्निः। या अग्निङ्गर्भन्दधिरे सुवर्णा-स्तास्त आपश्शꣳस्योना भवन्तु।।

यासाꣳ राजा वरुणो याति मद्ध्ये सत्यानृते अवपश्यञ्जनानाम्। या अग्निङ्गर्भन्दधिरे सुवर्णास्तास्त आपश्शꣳ स्योना भवन्तु।।

यासान्देवा दिविकृण्वन्ति भक्षयँ्या

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

अन्तरिक्षे बहुधा निविष्टाः। या अग्निङ्गर्भ-न्दधिरे सुवर्णा-स्तास्त आपश्शꣳस्योना भवन्तु।।

शिवेन त्वा चक्षुषा पश्यन्त्वाप-श्शिवया तन्वोपस्पृशन्तु त्वचन्ते। घृतश्चुत-श्शुचयो याः पावका-स्तास्त आपशꣳस्योना भवन्तु।

परित्वा गिर्वणो गिर इमा भवन्तु विश्वतः। वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः।।

आशासानेत्येषा।। (सं-१.१.१०)।।

[आशासाना सौमनसं प्रजाꣳसौभाग्यन्तनूम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

अग्नेरनुव्रता भूत्वा सन्नह्ये सुकृतायकम्]।।

पूषात्वेतो नयतु हस्तगृह्याश्विनौ त्वा प्रवहता ँ रथेन। गृहान्गच्छ गृहपत्नी यथाऽसो वशिनी त्वञ्विदथमावदासि।।

(भवन्तु पञ्च च)।।

इति प्रथमप्रश्ने द्वितीयः खण्डः।।

****

३ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः।।

सोमोऽददद्गन्धर्वाय गन्धर्वोऽददग्नये।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

रयिञ्च पुत्राꣳश्चादादग्निर्मह्यमथो इमाम्।।

गृभ्णामि ते सुप्रजास्त्वाय हस्तं मया पत्या जरदष्टि र्यथाऽसः। भगो अर्यमा सविता पुरन्धि र्मह्यन्त्वाऽदु र्गार्हपत्याय देवाः।।

तेह पूर्वे जनासो यत्र पूर्ववहो हिताः। मूर्द्धन्वान् यत्र सौभ्रवः पूर्वो देवेभ्य आऽतपत्।।

सरस्वति प्रेदमव सुभगे वाजिनीवति। तान्त्वा विश्वस्य भूतस्य प्रगायामस्यग्रतः।।

य एति प्रदिश स्सर्वा दिशोऽनु पवमानः। हिरण्यहस्त ऐरम्मस्सत्वा मन्मनसङ्कृणोतु।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

एकमिषे विष्णुस्त्वाऽन्वेतु द्वे ऊर्जे त्रीणि व्रताय चत्वारि मायोभवाय पञ्च पशुभ्य षडृतुभ्य स्सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वाऽन्वेतु।।

सखा सप्तपदा भव सखायौ सप्तपदा बभूव सख्यन्ते गमेयꣳ सख्यात्ते मायोषꣳ सख्यान्मे मायोष्ठा स्समयाव सङ्कल्पावहै संप्रियौ रोचिष्णू सुमनस्यमानौ।।

इषमूर्जमभि सव्वँसानौ सन्नौ मनाꣳसि सव्वँता समुचित्तान्याकरम्। *सात्वमस्यमूह-ममूहमस्मि सात्वन्द्यौरहं पृथिवीत्वꣳ रेतोऽहꣳ

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

रेतोभृत्त्वं मनोऽहमस्मि वाक्त्वꣳ सामाह-
मस्म्यृक्त्वꣳ सामामनुव्रता भव पुꣳसे पुत्राय
वेत्तवै श्रियै पुत्राय *वेत्तवा एहि सूनृते।।
(अग्रतष्षट् च)।।

इति प्रथमप्रश्ने तृतीयः खण्डः।।

****

४ सोमाय जनिविदे स्वाहा
गन्धर्वाय जनिविदे स्वाहाऽग्नये जनिविदे
स्वाहा।।

कन्यला पितृभ्यो यती पतिलोकमव
दीक्षामदास्थ स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

प्रेतो मुञ्चाति नामुत स्सुबद्धाममुतस्करत्

यथेय-मिन्द्रमीढ्व-स्सुपुत्रा सुभगाऽसति।।

इमान्त्वमिन्द्रमीढ्व स्सुपुत्राꣳ सुभगाङ्-

*कुरु। दशास्यां पुत्रानाधेहि पतिमेकादशङ्-

कृधि।।

अग्निरैतु प्रथमो देवतानाꣳ सोऽस्यै प्रजां

मुञ्चतु मृत्युपाशात्। तदयꣳ राजा वरुणो-

ऽनुमन्यता य्यथेयꣳ स्त्री पौत्रमघन्न रोदात्।।

इमामग्नि-स्त्रायताङ्- गार्हपत्यः प्रजा-

मस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवता-

मस्तु माता पौत्रमानन्दमभि प्रबुद्ध्यतामियम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

माते गृहे निशि घोष उक्थादन्यत्र त्वद्रुदत्य स्सव्विँशन्तु। मात्व व्विँकेश्युर आवधिष्ठा जीवपत्नी पतिलोके विराज पश्यन्ती प्रजा ँ सुमनस्यमानाम्।।

द्यौस्ते पृष्ठ ँ रक्षतु वायुरूरू अश्विनौ च स्तनन्धयन्त ँ सविताऽभिरक्षतु। आवाससः परिधानाद्-बृहस्पति र्विश्वेदेवा अभिरक्षन्तु पश्चात्।।

अप्रजस्तां पौत्रमृत्युं पाप्मानमुतवाऽघम्। शीर्ष्णा स्त्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पाशम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

इमं मे वरुण तत्त्वा यामि त्वन्नो अग्ने सत्वन्नो अग्ने त्वमग्ने अयास्ययासन्मनसा हितः। अयासन् हव्यमूहिषेऽयानो धेहि भेषजम्।। (इयमष्टौ च)।। (पुटम् 1.020)

इति प्रथमप्रश्ने चतुर्थः खण्डः।।

****

५ आतिष्ठेम-मश्मान-मश्मेव त्वꣳ स्थिरा भव। अभितिष्ठ पृतन्यत स्सहस्व पृतनायतः।।

इयन्नार्युपब्रूते कुल्पान्यावपन्तिका। दीर्घायुरस्तु मे पति र्जीवातु शरदश्शतम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

तुभ्यमग्रे पर्यवहन् थ्सूर्या व्वँहतुना सह।
पुनः पतिभ्यो जायान्दा अग्ने प्रजया सह।।
पुनः पत्नीमग्निरदादायुषा सह वर्चसा।
दीर्घायुरस्या यः पति-स्स एतु शरदश्शतम्।।
विश्वा उत त्वया वयन्धारा उदन्या इव।
अतिगाहेमहिद्विषः।।
आतिष्ठेममश्मानम्।।
अर्यमणन्नु देवङ्कन्या अग्निमयक्षत।
स इमान्देवो अदध्वरः प्रेतो मुञ्चाति नामुत
स्सुबद्धा-ममुतस्करत्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

तुभ्यमग्रे पर्यवहन्पुनः पत्नीमग्निरदाद्विश्वा उत त्वया वयमातिष्ठेममश्मानम्।।

त्वमर्यमा भवसि यत्कनीनान्नाम स्वधावथ्स्वर्यं बिभर्षि। अञ्जन्ति वृक्षꣳ सुधितन्न गोभि-र्यद्दम्पती समनसा कृणोषि।।

तुभ्यमग्रे पर्यवहन्पुनः पत्नीमग्निरदाद्विश्वा उत त्वया वयम्।।

प्रत्वा मुञ्चामि वरुणस्य पाशाद्येन त्वाऽबद्ध्नाथ्सविता सुकेतः। धातुश्च योनौ सुकृतस्य लोके स्योनन्ते सह पत्या करोमि।

इमव्विँष्यामि वरुणस्य पाशयँ्यमबद्ध्नीत

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

सविता सुशेवः। धातुश्च योनौ सुकृतस्य लोकेऽरिष्टान्त्वा सह पत्या कृणोमि।।

अयाश्चाग्नेऽस्यनभिशस्तीश्च *सत्यमित्वमया असि। अयसा मनसा *धृतोऽयसा हव्यमूहिषेऽयानो धेहि भेषजम्।।

(द्विषस्सुशेवस्त्रीणि च)।।

इति प्रथमप्रश्ने पञ्चमः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

६ स॒त्येनोत्तभिता॒ भूमि॒ स्सूर्ये॒णो-त्तभिता॒ द्यौः। ऋ॒तेनादि॒त्या स्तिष्ठन्ति दि॒वि सोमो॒ अधिश्रि॒तः।।

यु॒ञ्जन्ति॑ ब्र॒द्ध्नय्यँ॒योगे॑योगे।।

[यु॒ञ्जन्ति॑ ब्र॒द्ध्नमरु॒षञ्चर॑न्तं॒ परि॒-त॒स्थुषः। रोच॑न्ते रोच॒ना दि॒वि]।(सम्- ७.४.२०)

[योगे॑योगे त॒वस्त॑र॒ व्वाँजे॑वाजे हवामहे। सखा॑य॒ इन्द्र॑मू॒तये॑]।। (सम्- ४.१.२)

सु॒कि॒ꣳशु॒कꣳश॑ल्म॒लिं वि॒श्वरू॑प॒ꣳहिर॑ण्य-वर्णꣳसु॒वृत॑ꣳसुच॒क्रम्। आरोह वद्ध्व॒मृत॑स्य लो॒कꣳस्यो॒नं पत्ये वह॒तुङ्-कृ॑णुष्व।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

उदुत्तरमारोहन्ती व्यस्यन्ती पृतन्यतः।
मूर्द्धानं पत्युरारोह प्रजया च विराड्भव।।

सम्राज्ञी श्वशुरे भव सम्राज्ञी *श्वश्रुवां भव। ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु।।

स्नुषाणा ँ श्वशुराणां प्रजायाश्च धनस्य च। पतीनाञ्च देवृणाञ्च सजातानाँ विराड्भव।।

नीललोहिते भवतः कृत्यासक्ति व्यज्यते।
एधन्तेऽस्या ज्ञातयः पति र्बन्धेषु बद्ध्यते।।

ये वद्ध्व- श्चन्द्र- व्वहतु- य्यक्ष्मायन्ति

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

जना॒ँ अनु॑। पुन॒स्तान् य॒ज्ञिया॑ दे॒वा नय॑न्तु॒ यत॒ आग॑ताः।।

मा वि॑दन्परि प॒न्थिनो॒ य आ॒सीद॑न्ति॒ दम्प॑ती। सु॒गेभि॑र्दु॒र्गमतीता॒-मप॑द्रा॒न्त्वरा॑तयः।।

सु॒गं पन्था॑न॒- मारु॑क्ष॒- मरि॑ष्टꣳ स्वस्ति॒ वाह॑नम्। यस्मि॑न् वी॒रो नरि॑ष्य॑त्य॒न्येषा॑- व्वि॒न्दते॒ वसु॑।। (धन॑स्य च॒ नव॑ च)।।

इति प्रथमप्रश्ने षष्ठः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

७ तामन्दसानामनुषोदुरोण आधत्त॑ रयिन्दशवीर-व्वँचस्यवे। कृतन्तीर्थ॑सुप्रपाण॑ शुभस्पती स्थाणुं पथेष्ठामप दुर्मति॑ हतम्।।

अयन्नो मह्याः पार॑स्वस्ति नेषद्वनस्पतिः। सीरान- स्सुतरा भव दीर्घायुत्वाय वर्चसे।।

अस्य पारे निर्ऋथस्य जीवा ज्योतिरशीमहि। मह्या इन्द्र स्वस्तये।।

यदृते चिदभिश्रिषः पुरा जर्तृभ्य आतृदः। सन्धाता सन्धिं मघवा पुरोवसु र्निष्कर्ता *विह्रुतं पुनः।।

इडामग्न -इमं मे वरुण- तत्वा यामि-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

त्वन्नो अग्ने- सत्वन्नो अग्ने- त्वमग्ने अयासि॥

[इडामग्ने पुरुदꣳसꣳसनिङ्-गोश्शश्वत्तमꣳ हवमानायसाध। स्यान्न स्सूनु स्तनयो विजावा ऽग्ने साते सुमति र्भूत्वस्मे]।। (सम्-४.२.४)

[इमं मे वरुण श्रुधीहवमद्या च मृडय। त्वामवस्युराचके]।।

[तत्वा यामि ब्रह्मणा वन्दमान स्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोद्ध्युरुशꣳस मान आयुः प्रमोषीः]

[त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो-ऽवयासिसीष्ठाः। यजिष्ठो वह्नितम-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्शोशुचानो विश्वाद्वेषाᳬसि प्रमुमुग्ध्यस्मत्]।।

[सत्वन्नो अग्नेऽवमो भवोतीनेदिष्ठो अस्या उषसो व्युष्टौ। अवयक्ष्वनो वरुणᳬ रराणो वीहि मृडीकᳬ सुहवो न एधि]।।

(२.१.११)-(२.१.११)-(२.५.१२)-(२.५.१२)।।

[त्वमग्ने अयास्ययासन्मनसा हितः। अयासन् हव्यमूहिषेऽयानो धेहि भेषजम्]।।

ये गन्धर्वा अप्सरसश्च देवीरेषु वृक्षेषु वानस्पत्येष्वासते। शिवास्ते अस्यै वद्ध्वै भवन्तु मा हिᳬसिषु र्वहतुमूह्यमानाम्।।

या ओषधयो या नद्यो यानि धन्वानि ये

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

ये वना। तेत्वा वधु प्रजावतीं प्रत्वे मुञ्चत्वꣳहसः।।

सङ्काशयामि वहतुं ब्रह्मणा गृहैरघोरेण चक्षुषा मैत्रेण। पर्याणद्धं विश्वरूप-यँयदस्याꣳ स्योनं पतिभ्य स्सविता कृणोतु तत्।।

आवामगन्थ्सुमति र्वाजिनी *वसून्यश्विना हथ्सुकामाꣳ अयꣳसत। अभूतङ्गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्याꣳ अशीमहि।।

अयन्नो देवस्सविता बृहस्पतिरिन्द्राग्नी मित्रावरुणा स्वस्तये। त्वष्टा विष्णुः प्रजया

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

सꣳरराणः काम आयातङ्कामाय त्वा विमुञ्चतु।। *(आसते नव च)*।।

इति प्रथमप्रश्ने सप्तमः खण्डः।।

****

८ शर्म वर्मेदमाहरास्यै नार्या उपस्तिरे। सिनीवालि प्रजायतामियं भगस्य सुमतावसत्।।

गृहान्भद्रान्थ्सुमनसः प्रपद्ये ऽवीरघ्नी वीरवतस्सुवीरान्। इराव्वहतो घृतमुक्षमाणा-स्तेष्वहꣳ सुमना स्सव्विशामि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

आगन्गोष्ठं महिषी गोभिरश्वैरायुष्मत्पत्नी प्रजया स्वर्वित्। बह्वीं प्रजाञ्जनयन्ती सुरत्नेममग्निꣳशतहिमा स्सपर्यात्।।

अयमग्नि र्गृहपति स्सुसꣳ सत्पुष्टि वर्द्धनः। यथा भगस्याभ्यान्ददद्रयिं पुष्टिमथो प्रजाम्।।

प्रजाया आभ्यां प्रजापत इन्द्राग्नी शर्म यच्छतम्। यथैनयो र्न प्रमीयाता उभयो र्जीवतोः प्रजा।।

तेन भूतेन हविषा ऽयमाप्यायतां पुनः। जायां यामस्मा आवाक्षुस्ताꣳरसेनाभिवर्द्धताम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

अभिवर्द्धतां पयसाऽभिराष्ट्रेण वर्द्धताम्। रय्या सहस्रपोषसेमौस्तामनपेक्षितौ।।

इहैवस्तं मा *वियोष्टं विश्वमायुर्व्यश्नुतम्। मह्या इन्द्र स्वस्तये।।

ध्रुवैधि पोष्या मयि मह्यन्त्वाऽदाद्-बृहस्पतिः। मया पत्या प्रजावती सञ्जीव शरदश्शतम्।।

त्वष्टा जाया-मजनय-त्त्वष्टाऽस्यै त्वां पतिम्। त्वष्टा सहस्रमायूंषि दीर्घमायुः कृणोतु वाम्।।

इमं मे वरुण तत्वा यामि त्वन्नो अग्ने

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

सत्वन्नो अग्ने त्वमग्ने अयासि।। (पुटम् 1.020)

(जीवतोः प्रजा वामेकञ्च)।।

इति प्रथमप्रश्ने अष्टमः खण्डः।।

****

९ इह गावः प्रजायद्ध्वमिहाश्वा इह पूरुषाः। इहो सहस्र दक्षिणो रायस्पोषो निषीदतु।।

सोमेनादित्या बलिन स्सोमेन पृथिवी दृढा। अथो नक्षत्राणामेषामुपस्थे सोम आधितः।।

प्रस्वस्स्थः प्रेयं प्रजया भुवने शोचेष्ट।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

इह प्रियं प्रजया ते समृद्ध्यतामस्मिन्गृहे गार्हपत्याय जागृहि। एनापत्या तन्वꣳ सꣳसृजस्वाथा जीव्री विदथमावदासि।।

सुमङ्गलीरिय वँधूरिमाꣳसमेत पश्यत। सौभाग्यमस्यै दत्वा याथास्त विँपतरेतन।।

ध्रुवक्षिति द्र्ध्रुवयोनि द्र्ध्रुवमसि द्र्ध्रुवतस्थितम्। त्वन्नक्षत्राणां मेथ्यसि स मा पाहि पृतन्यतः।।

सप्तर्षयः प्रथमाङ्कृत्तिकानामरुन्धतीम् यद्ध्रुवताꣳ ह निन्युषट्कृत्तिका मुख्ययोगवँहन्तीयमस्माकमेधत्वष्टमी।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषम्।।

उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम। पशूंश्च मह्यमावह जीवनञ्च दिशो *दिश।

मानो हिंसी-ज्जातवेदो गामश्वं पुरुष-ञ्जगत्। अबिभ्रदग्न आगहि श्रिया मा परि पातय।। (ध्रुवतस्स्थितन्नव च)।।

इति प्रथमप्रश्ने नवमः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

१० उदीर्ष्वातो विश्वावसो नमसेडामहे त्वा। अन्यामिच्छ प्रफर्व्यꣳ सञ्जायां पत्यासृज।।

उदीर्ष्वातः *पतिवती ह्येषा विश्वावसुन्नमसा गीर्भिरीट्टे। अन्यामिच्छ पितृषदं व्यक्ताꣳस ते भागो जनुषा तस्य विद्धि।।

अग्ने प्रायश्चित्ते त्वन्देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये याऽस्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यै ताङ्कृणोमि स्वाहा।।

वायो प्रायश्चित्त आदित्य प्रायश्चित्ते

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

प्रजापते प्रायश्चित्ते त्वन्देवानां प्राय-
श्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये
यऽस्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी
लक्ष्मिघ्नी जारघ्नीमस्यै ताङ्कृणोमि स्वाहा ।।

प्रसवश्चोपयामश्च काटश्चार्णवश्च
धर्णसिश्च द्रविणञ्च भगश्चान्तरिक्षञ्च
सिन्धुश्च समुद्रश्च सरस्वाꣳश्च
विश्वव्यचाश्च ते यन्द्विष्मो यश्च नो द्वेष्टि
तमेषाञ्जम्भे दद्ध्मस्स्वाहा ।।

मधुश्च माधवश्च शुक्रश्च शुचिश्च
नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः।।

सहस्यश्च तपश्च तपस्यश्च ते यन्द्विष्मो यश्च नो द्वष्टि तमेषाञ्जम्भे दद्ध्म स्स्वाहा।

चित्तञ्च चित्तिश्चाकूत- ञ्चाकूति-श्चाधीत-ञ्चाधीतिश्च विज्ञातञ्च विज्ञानञ्च नाम च क्रतुश्च दर्शश्च पूर्णमासश्च ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्म स्स्वाहा।।

भूस्स्वाहा भुवस्स्वाहा सुवस्स्वाहोँ स्वाहा।।

(उदीर्ष्वातो दश)।।

इति प्रथमप्रश्ने दशमः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

११ अपश्यन्त्वा मनसा चेकितान-न्तपसो जातन्तपसो विभूतम्। इह प्रजामिह रयि॑रराणः प्रजायस्व प्रजया पुत्रकाम।।

अपश्यन्त्वा मनसा दीद्ध्यानाᳬस्वायां*तनू ऋत्विये नाथमानाम्। उपमामुच्चा युवति र्बुभूयाः प्रजायस्व प्रजया पुत्रकामे।।

समञ्जन्तु विश्वे देवास्समापो हृदयानि नौ। संमातरिश्वा सन्धाता समुदेष्ट्री दिदेष्टुनौ॥

प्रजापते तन्वं मे जुषस्व त्वष्ट र्देवेभि-स्सहसाम इन्द्र। विश्वैर्देवैरातिभि स्सᳬ रराणः पुᳬसां बहूनां मातरस्स्याम।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

आनः प्रजाञ्जनयतु प्रजापतिरा-जरसाय समनक्त्वर्यमा। अदुर्मङ्गलीः पति लोक-माविश *शन्नो भव द्विपदे शञ्चतुष्पदे।।

तां पूषञ्छिवतमा मेरयस्व यस्यां बीजं मनुष्या वपन्ति। यान ऊरू उशती विस्रयातै यस्यामुशन्तः *प्रहरेम शेफम्।।

(शञ्चतुष्पदे द्वे च)।।

इति प्रथमप्रश्ने एकादशः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

१२ आरोहोरु-मुपबर्हस्व बाहुं परिष्वजस्व जायाᳬसुमनस्यमानः। तस्यां पुष्यतं मिथुनौ सयोनी बह्वीं प्रजाञ्जनयन्तौ सरेतसा।।

आर्द्रयाऽरण्या यत्रामन्थत्पुरुषं पुरुषेण शक्रः। तदेतौ मिथुनौ सयोनी प्रजयाऽमृतेनेह गच्छतम्।।

अहङ्गर्भ-मदधा-मोषधीष्वहं विश्वेषु भुवनेष्वन्तः। अहं प्रजा अजनयं पितृणामहञ्जनिभ्यो *अपरीषु पुत्रान्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

पुत्रिणेमा कुमारिणा विश्वमायु र्व्यश्नुतम्।

उभा हिरण्यपेशसा वीतिहोत्रा कृतद्वसू।।

दशस्यन्त्वा ऽमृताय कꣳशमूर्धो

रोमशꣳहथो देवेषु कृणुतो दुवः।।

(आरोह नव)।।

इति प्रथमप्रश्ने द्वादशः खण्डः।।

****

१३ विष्णु र्योनिङ्-कल्पयतु त्वष्टा

रूपाणि पिꣳशतु। आसिञ्चतु प्रजापति र्धाता

गर्भन्दधातु ते।।

गर्भन्धेहि सिनीवालि गर्भन्धेहि सरस्वति।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

गर्भन्ते अश्विनौ देवावाधत्तां पुष्करस्रजा।।

हिरण्ययी अरणी-यन्निर्मन्थतो अश्विना।

तन्ते गर्भ ँहवामहे दशमे मासि सूतवे।।

यथेयं पृथिवी मही तिष्ठन्ती गर्भमादधे।

*एवन्त्वङ्-गर्भमाधथ्स्व दशमे मासि सूतवे।।

यथा पृथिव्यग्नि गर्भा द्यौ र्यथेन्द्रेण

गर्भिणी। वायु र्यथा दिशाङ्-*गर्भ एवङ्-

गर्भन्दधामि ते।।

विष्णो श्रेष्ठेन रूपेणास्या- न्नार्याङ्-

गवीन्याम्। पुमाँसङ्- गर्भमाधेहि दशमे

मासि सूतवे।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

नेजमेष परापत *सुपुत्रः पुनरापत। अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान्।।

व्यस्य योनिं प्रतिरेतो गृहाण पुमान्पुत्रो धीयताङ्-गर्भो अन्तः। तं माता दशमासो बिभर्तु सजायता वीरतम-स्स्वानाम्।।

आते गर्भो योनिमेतु पुमान्बाण इवेषुधिम्। आवीरो जायतां पुत्रस्ते दशमास्यः।।

(गर्भन्दधामि तेऽष्टौ च)।।

इति प्रथमप्रश्ने त्रयोदशः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१४ करोमि ते प्राजापत्य-मागर्भो योनिमेतु ते। अनूनः पूर्णो जायतामश्लोणोऽपिशाचधीतः।।

पुमाꣳस्ते पुत्रो *नारितं पुमाननुजायताम्।
तानि भद्राणि बीजान्यृषभा जनयन्तु नौ।।

यानि भद्राणि बीजान्यृषभा जनयन्ति नः।
तैस्त्वं पुत्रान् विन्दस्व सा प्रसूर्धेनुका भव।।

कामप्रमृद्ध्यतां मह्यमपराजितमेव मे।
यङ्कामङ्कामयेदेव तं मे वायो समर्द्धय।।

अनुहवं परिहवं परीवादं परिक्षपम्।
दुस्स्वप्न-न्दुरुदितन्तद्द्विषद्भ्यो दिशाम्यहम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

अनुहूतं परिहूतꣳ *शकुने यदशाकुनम्।
मृगस्य सृतमक्ष्णया तद्द्विषद्भ्यो दिशाम्यहम्।।
आरात्ते अग्निरस्त्वारात्परशुरस्तु ते।
निवाते त्वा ऽभिवर्षतु स्वस्ति तेऽस्तु
वनस्पते स्वस्ति मेऽस्तु वनस्पते।।
नमश्शकृत्सदे रुद्राय नमो रुद्राय
शकृत्सदे। गोष्ठमसि नमस्ते अस्तु मामा
हिꣳसी-स्सिगसिनसि वज्रो नमस्ते अस्तु मा
मा हिꣳसीः।।
उद्गातेव शकुने सामगायसि ब्रह्मपुत्र इव
सवनेषु शꣳससि।। स्वस्ति नश्शकुने अस्तु

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

प्रतिन स्सुमना भव।। (अहमष्टौ च)।।

इति प्रथमप्रश्ने चतुर्दशः खण्डः।।

****

१५ प्रातरग्निं प्रातरिन्द्रꣳहवामहे प्रातर्मित्रावरुणा प्रातरश्विना। प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातस्सोममुत रुद्रꣳहुवेम।।

प्रातर्जितं भगमुग्र हुवेम वयं पुत्रमदिते र्यो विधर्ता। आद्ध्रश्चिद्यं मन्यमान-स्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह।।

भगप्रणेतर्भग सत्यराधो भगेमा- न्धिय-मुदवददन्नः। भग प्रणो जनय गोभिरश्वै र्भग

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

प्रनृभि र्नृवन्तस्स्याम।।

उतेदानीं भगवन्त स्स्यामोत प्रपित्व उत मद्ध्ये अह्नाम्। उतोदिता मघवन्थ्सूर्यस्य वयन्देवानाꣳसुमतौ स्याम।।

भग एव भगवाꣳअस्तु देवा स्तेन वयं भगवन्तस्स्याम। तन्त्वा भग सर्व इज्जोहवीमि स नो भग पुर एता भवेह।।

समद्ध्वरायोषसो ऽनमन्त दधिक्रावेव शुचये पदाय। अर्वाचीनं वसुविदं भगन्नो रथमिवाश्वा वाजिन आवहन्तु।।

अश्वावती र्गोमती र्न उषासो वीरवती-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

स्सदमुच्छन्तु भद्राः। घृतन्दुहाना विश्वतः प्रपीना यूयं पात स्वस्तिभि स्सदा नः।।

(भवेह चत्वारि च)।।

इति प्रथमप्रश्ने पञ्चदशः खण्डः।।

****

१६ इमाङ्-खनाम्योषधी व्वीरुधं बलवत्तमाम्। यया सपत्नीं बाधते यया सव्विन्दते पतिम्।।

उत्तानपर्णे सुभगे सहमाने सहस्वति। सपत्नीं मे पराधमपतिं मे केवलङ्-कृधि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

उत्तराऽहमुत्तर *उत्तरेदुत्तराभ्यः। अथा सपत्नी या ममाधरा साऽधराभ्यः।।

नह्यस्यै नाम गृभ्णामि नो अस्मिन्रमते जने। परामेव परावतꣳसपत्नीन्नाशयामसि।।

अहमस्मि सहमानाऽथ त्वमसि सासहिः। उभे सहस्वती भूत्वा सपत्नीं मे सहावहै।।

उप तेऽधाꣳ सहमानामभि त्वाऽधाꣳ सहीयसा। मामनु प्रते मनो वत्सङ्गौरिव धावतु पथावारिव धावतु।। (सहावहै द्वे च)।

इति प्रथमप्रश्ने षोडशः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१७ उदसौ सूर्यो अगादुदयं मामको भगः। अहन्तद्विद्वलापतिमभ्यसाक्षि विषासहिः॥

अहङ्केतुरहं *मूर्द्धाऽहमुग्राविवाचनी।

*ममेदनुक्रतुं पति स्सेहानाया उवाचरेत्।।

मम पुत्रा श्शत्रुहणो ऽथो मे दुहिता विराट्।

उताहमस्मि सञ्जया पत्युर्मे श्ळोक उत्तमः।।

येनेन्द्रो हविषा कृत्यभवद्दिव्युत्तमः।

*अहन्तदक्रिदेवा असपत्ना किलाभवम्।।

असपत्ना सपत्निघ्नी जयन्त्यभिभूवरी*।

आविथ्सि सर्वासाꣳ राधो वर्चो अस्थेयसामिव।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

समजैषमिमा अहꣳ सपत्नीरभिभूवरीः।
यथाऽहमस्य वीरस्य विराजामि धनस्य च।।

(अस्थेयसामिव द्वे च)।।

इति प्रथमप्रश्ने सप्तदशः खण्डः।।

****

१८ अक्षीभ्यान्ते नासिकाभ्याङ्-
कर्णाभ्या- ञ्चुबुकादधि। यक्ष्मꣳ शीर्षण्यं
मस्तिष्का-ज्जिह्वाया विवृहामि ते।।

ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो ऽनू-
क्यात्। यक्ष्मन्दोषण्यमꣳसाभ्यां बाहुभ्या-
व्विँवृहामि ते।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर् हृदया-दधि। यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो विवृहामि ते।।

ऊरुभ्यान्ते- ऽष्ठीवद्भ्यां- ञ्जङ्घाभ्यां प्रपदाभ्याम्। यक्ष्मꣳ श्रोणीभ्यां *भासदाद्ध्वꣳससो विवृहामि ते।।

मेहनाद्वलङ्करणा-ल्लोमभ्यस्ते नखेभ्यः। यक्ष्मꣳ सर्वस्मा-दात्मनस्तमिम व्विवृहामि ते।।

अङ्गादङ्गा-ल्लोम्नो लोम्नो जातं पर्वणि पर्वणि। यक्ष्मꣳ सर्वस्मादात्मन-स्तमिम- व्विवृहामि ते।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

परादेहि शाबल्यं ब्रह्मभ्यो विभजावसु।

कृत्यैषापद्वती भूत्वा जायाऽऽविशते पतिम्।।

अश्लीला *तनूर्भवरुशती पापयाऽमुया।

पतिर्यद्वद्ध्वै *वाससा स्वमङ्गमभिधिथ्सति।।

क्रूरमेत्कटुकमेतदपाष्ठवद्विषवन्नैतदत्तवे।

सूर्यां यः प्रत्यक्षं विद्याथ्स एतत्प्रतिगृह्णीयात्।।

आशसन-व्विँशसनमथो अधिविचर्तनम्।

सूर्यायाः पश्य रूपाणि तानि

ब्रह्मोतशꣳसति।। (इमं विवृहामि ते शꣳसति)।।

[अक्षीभ्यां ग्रीवाभ्य आन्त्रेभ्य ऊरुभ्यां मेहना-

दङ्गादङ्गा- त्परादेहि सप्त]।।

इति प्रथमप्रश्ने अष्टादशः खण्डः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे प्रथमः प्रश्नः ।।

प्रसुग्मन्ताऽष्टादश हिरण्यवर्णाः पञ्चदश सोमः प्रथम षोडश सोमाय जनिविदे ऽष्टादशाऽऽतिष्ठेम-न्त्रयोविꣳशति स्सत्येन तामन्दसानैकान्नविꣳशति-रेकान्नविꣳशति श्शर्मवर्मैकविꣳशति- रिहगाव एकान्नविꣳशति-रुदीर्ष्वातो दशापश्यन्त्वा द्वादशा-रोहोरुन्नव विष्णुर्योनिं करोमि तेऽष्टादशाष्टादश प्रातरग्निं चतुर्दशेमां खनाम्युदसौ सूर्यो द्वादश द्वादशाक्षीभ्यान्ते विꣳशतिरष्टादश।। [१८]।।

प्रसुग्मन्ताऽपश्यन्त्वा ऽष्टादश।।[१८]।।

प्रसुग्मन्ता तानि ब्रह्मोत शꣳसति।।

हरिः ओ(३)म्।।

इत्येकाग्निकाण्डे प्रथमः प्रश्नः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओं श्रीगणेश शारदा गुरुभ्यो नमः।।
श्रीवेदव्यासाय नमः।।

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

हरिः ओ(४)म्

१ उष्णेन वायवुदकेनेह्यद्भिरिति केशान् वपतु।।

आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे। ज्योक्च सूर्यन्दृशे।।

येनावप-थ्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्माणो वपतेद-मस्यायुष्मा- ञ्जरदष्टि र्यथाऽसदयमसौ।।

येन पूषा बृहस्पतेरग्नेरिन्द्रस्य चायुषे ऽवपत्। तेनास्यायुषे वप सौश्लोक्याय स्वस्तये।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

येन भूयश्चरात्यय- ञ्ज्योक्च पश्यात्ति सूर्यम्। तेनास्यायुषे वप सौश्लोक्याय स्वस्तये।।

येन पूषा बृहस्पते- रग्नेरिन्द्रस्य चायुषे ऽवपत्। तेन ते वपाम्यसावायुषा वर्चसा यथा ज्योक्सुमना असाः।।

यत्क्षुरेण मर्चयता सुपेशसा वप्त्रा वपसि केशान्। *शुन्धि शिरो मास्यायुः प्रमोषीः।।

उप्त्वाय केशान् वरुणस्य राज्ञो बृहस्पति स्सविता सोमो अग्निः। तेभ्यो निधानं बहुधा ऽन्वविन्दन्नन्तरा द्यावापृथिवी अपस्सुवः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

(आयुषेऽवपत्पञ्च च)।।

इति द्वितीयप्रश्ने प्रथमः खण्डः।।

****

२ आयुर्दा देवजरसङ्- गृणानो-

घृतप्रतीको घृतपृष्ठो अग्ने। घृतं

पिबन्नमृतञ्चारु गव्यं पितेव पुत्रञ्जरसे

नयेमम्।।

आतिष्ठेम-मश्मान-मश्मेव त्वꣳ स्थिरो

भव। अभितिष्ठ पृतन्यत स्सहस्व पृतनायतः।।

रेवतीस्त्वा व्यक्षण- न्कृत्तिका-श्चाकृन्तꣳ

स्त्वा*। धियोऽवयन्नवग्ना* अवृञ्जन्थ्सहस्र-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

मन्ताᳬ अभितो अयच्छन्।।

देवीर्देवाय परिधी सवित्रे। महत्तदासा-

मभवन्महित्वनम्।।

या अकृन्तन्नवयन् या अतन्वतयाश्च

देवीरन्तानभितोऽददन्त। तास्त्वा देवी र्जरसे

सव्ँव्ययन्त्वायुष्मानिदं परिधत्स्व वासः।।

परिधत्त धत्तवाससैनᳬ शतायुषङ्-कृणुत

दीर्घमायुः। बृहस्पतिः प्रायच्छद्वास एतत्

सोमाय राज्ञे परिधात वा उ।।

जराङ्गच्छासि परिधत्स्व वासो भवा

कृष्टीना- मभिशस्ति पावा। शतञ्च जीव

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

शरद-स्सुवर्चा रायश्च पोषमुप सव्ँ व्ययस्व।।

परीदव्ँ वासो अधिता स्स्वस्तयेऽभूरापीना-

मभिशस्तिपावा। शतञ्च जीव शरदः पुरूची

र्वसूनि *चार्यो विभजासि जीवन्।।

इयन्दुरुक्तात्परिबाधमाना शर्म वरूथं

पुनतीन आगात्। प्राणापानाभ्यां बलमा-

भरन्ती प्रिया देवानाꣳ सुभगा मेखलेयम्।।

ऋतस्य गोप्त्री तपसः *परस्पी घ्नती रक्ष

स्सहमाना अरातीः। सा नस्समन्तमनु परीहि

भद्रया भर्तारस्ते मेखले मा रिषाम।।

मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

*स्थविरꣳ समिद्धम्। अनाहनस्य- व्वँसन- ञ्जरिष्णु परीद-व्वाज्यजिन- न्दधेऽहम्।।

(वासो मारिषाम् द्वे च)।।

इति द्वितीय प्रश्ने द्वितीयः खण्डः।।

****

३ आगन्त्रासमगन्महि प्रसुमृत्युं युयोतन। अरिष्टा स्सञ्चरेमहि स्वस्ति चरतादिह स्वस्त्या गृहेभ्यः।।

समुद्रादूर्मि र्मधुमाꣳ उदारदुपाꣳशुना सममृतत्व- मश्याम्। इमेनुते रश्मय स्सूर्यस्य येभि स्सपित्वं पितरो न आयन्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

अग्निष्टे हस्तमग्रभी- थ्सोमस्ते हस्तमग्रभी- थ्सविता ते हस्तमग्रभी- थ्सरस्वती ते हस्तमग्रभी- त्पूषा ते हस्तमग्रभी- दर्यमा ते हस्तमग्रभी-*द ँ शुस्ते हस्तमग्रभीद्- भगस्ते हस्तमग्रभी- न्मित्रस्ते हस्तमग्रभी- न्मित्रस्त्वमसि धर्मणा ऽग्नि- राचार्यस्तव* ।।

अग्नये त्वा परिददाम्यसौ सोमाय त्वा परिददाम्यसौ सवित्रे त्वा परिददाम्यसौ सरस्वत्यै त्वा परिददाम्यसौ मृत्यवे त्वा परिददाम्यसौ यमाय त्वा परिददाम्यसौ

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

गदाय त्वा परिददाम्यसा- वन्तकाय त्वा परिददाम्यसा- वद्भ्यस्त्वा परिददाम्यसा- वोषधीभ्यस्त्वा परिददाम्यसौ पृथिव्यै त्वा स वैश्वानरायै परिददाम्यसौ।।

देवस्या त्वा सवितुः प्रसव उपनयेऽसौ।।

सुप्रजाः प्रजया भूया स्सुवीरो वीरै स्सुवर्चा वर्चसा सुपोषः पोषैः।।

ब्रह्मचर्यमागामुप मा नयस्व देवेन सवित्रा प्रसूतः।।

को नामाऽस्यसौ नामाऽस्मि कस्य ब्रह्मचार्यस्यसौ प्राणस्य ब्रह्मचार्यस्म्यसावेष ते

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

देवसूर्य ब्रह्मचारी *तङ्गोपाय समामृतैष ते सूर्यपुत्र स्सदीर्घायु स्समामृत। याꣳस्वस्तिमग्निर्वायु स्सूर्यश्चन्द्रमा आपोऽनु सञ्चरन्ति ताꣳस्वस्तिमनु सञ्चरासौ।।

अद्ध्वनामद्ध्वपते श्रेष्ठस्याद्ध्वनः पारमशीय।।

(समामृत द्वे च)।।

इति द्वितीयप्रश्ने तृतीयः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

४ योगेयोगे तवस्तरमिममग्न आयुषे वर्चसे कृधीतिद्वे।। (पुटम् 1.016)

[इममग्न आयुषे वर्चसे कृधि प्रिय ७ रेतो वरुण सोमराजन्। मातेवास्मा अदिते शर्म यच्छ विश्वेदेवा जरदष्टि र्यथाऽसत्] (सम्-२.३.१०)

शतमिन्नु शरदो अन्ति देवा यत्रानश्चक्रा ञ्जरसन्तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्या रीरिषतायुर्गन्तोः।।

अग्निष्ट आयुः प्रतरान्दधात्वग्निष्टे पुष्टिं प्रताराङ्कृणोतु। इन्द्रो मरुद्भिर् ऋतुधा कृणोत्वादित्यैस्ते वसुभिरादधातु।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

मेधां मह्यमङ्गिरसो मेधा७ सप्तर्षयो ददुः। मेधां मह्यं प्रजापतिर्मेधामग्निर्ददातु मे।।

*अप्सरासु या मेधा गन्धर्वेषु च यद्यशः। दैवी या मानुषी मेधा सा मामाविशतादिह।।

इमं मे वरुण तत्त्वा यामि त्वन्नो अग्ने सत्वन्नो अग्ने त्वमग्ने अयासि।।(पुटम् 1.020)

राष्ट्रभृदस्याचार्यासन्दी मात्वद्योषम्।।

तथ्सवितुर्वरेण्यमित्येषा।।

अवृधमसौ सौम्य प्राण स्वं मे गोपाय।।

ब्रह्मण आणीस्थः।।(त्वमग्ने अयासि चत्वारिच)।।

इति द्वितीयप्रश्ने चतुर्थः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

पश्येम शरदश्शत-ञ्जीवेम शरदश्शत-न्नन्दाम शरदश्शतं मोदाम शरदश्शतं भवाम शरदश्शतꣳ शृणवाम शरदश्शतं प्रब्रवाम शरदश्शत- मजीतास्स्याम शरदश्शत-ञ्ज्योक्च सूर्यन्दृशे।।

यस्मिन्भूतञ्च भव्यञ्च सर्वे लोका-स्समाहिताः। तेन गृह्णामि त्वामहं मह्यङ्गृह्णामि त्वामहं प्रजापतिना त्वा मह्यङ्गृह्णाम्यसौ।। (सुश्रवो नव)।।

इति द्वितीयप्रश्ने पञ्चमः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

६ परित्वाऽग्ने परिमृजाम्यायुषा च धनेन च। सुप्रजाः प्रजया भूयासꣳ सुवीरो वीरै- स्सुवर्चा वर्चसा सुपोषः पोषै- स्सुगृहो गृहै- स्सुपतिः पत्या सुमेधा मेधया *सुब्रह्मा ब्रह्मचारिभिः।।

अग्नये समिधमाहार्षं बृहते जातवेदसे। यथात्वमग्ने समिधा समिद्ध्यस एवं मामायुषा वर्चसा सन्या मेधया प्रजया पशुभि र्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा।।

एधोऽस्येधिषीमहि स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

समिदसि समेधिषीमहि स्वाहा।।

तेजोऽसि तेजो मयि धेहि स्वाहा।।

अपो अद्यान्वचारिषꣳ रसेन समसृक्ष्महि। पयस्वाꣳ अग्न आगमन्तं मा सꣳसृज वर्चसा स्वाहा।।

संमाऽग्ने वर्चसा सृज प्रजया च धनेन च स्वाहा।।

विद्युन्मे अस्य देवा इन्द्रो विद्याथ्सहर्षिभिस्स्वाहा।।

अग्नये बृहते नाकाय स्वाहा।।

द्यावापृथिवीभ्याꣳ स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

एषा ते अग्ने समित्तया वर्द्धस्व चाप्यायस्व च तयाऽहं वर्द्धमानो भूयासमाप्यायमानश्च स्वाहा।।

योऽमाग्ने भागिनꣳ सन्तमथाभागञ्चिकीर्षति। अभागमग्ने तङ्कुरु मामग्ने भागिनङ्कुरु स्वाहा।।

समिधमाधायाग्ने सर्वव्रतो भूयासꣳ स्वाहा।।

ब्रह्मचार्यस्यपोऽशान कर्म कुरु मा सुषुप्थाः। भिक्षाचर्यञ्चराचार्याधीनो भव।।

यस्य ते प्रथमवास्यꣳ हरामस्तन्त्वा विश्वे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

अवन्तु देवाः। तन्त्वा भ्रातरस्सुवृधो वर्द्धमानमनुजायन्तां बहव स्सुजातम्।।

(धनेन च स्वाहा देवा एकञ्च)।।

इति द्वितीयप्रश्ने षष्ठः खण्डः।।

****

७ इमꣳ स्तोममर्हते जातवेदसे रथमिव संमहेमा मनीषया। भद्राहिनः प्रमतिरस्य सꣳसद्यग्ने सख्ये मारिषामा वयन्तव।।

त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवाना-न्त्र्यायुषन्तन्मे अस्तु त्र्यायुषम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा माहिꣳसीः।।

उष्णेन वायवुदकेनेत्येषः।। *(पुटम् 2.051)*

इदमह- ममुष्या- मुष्यायणस्य पाप्मान-*मपगूहाम्युत्तरोऽसौ द्विषद्भ्यः।।

आपोहिष्ठा मयोभुव इति तिस्रो हिरण्यवर्णा श्शुचयः पावका इति तिस्रः।।

अन्नाद्याय व्यूहद्ध्व- न्दीर्घायुरह- मन्नादो भूयासम्। सोमो राजाऽयमागमथ्स मे मुखं प्रवेक्ष्यति भगेन सह वर्चसा।।

सोमस्य तनूरसि तनुवं मे पाहि स्वामा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

तनूराविश।।

नमो ग्रहाय चाभिग्रहाय च नमश्शाकजञ्जभाभ्या- न्नमस्ताभ्यो देवताभ्यो या अभिग्राहिणीः।।

अप्सरस्सु यो गन्धो गन्धर्वेषु च यद्यशः। दैवो यो मानुषो गन्धस्स मा गन्ध स्सुरभि र्जुषताम्।।

*इयमोषधे त्रायमाणा सहमाना सहस्वती। सा मा हिरण्यवर्चसं *ब्रह्मवर्चसिनं मा करोतु।।

अपाशोऽस्युरो मे मा सꣳशारी शिवो

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

मोपतिष्ठस्व दीर्घायुत्वाय शतशारदाय।

शतꣳशरद्भ्य आयुषे वर्चसे जीवात्वै पुण्याय॥

रेवतीस्त्वा व्यक्षण्नित्येताः।। (पुटम् 2.053)

(सह वर्चसा नव च)।।

इति द्वितीयप्रश्ने सप्तमः खण्डः।।

****

८ आयुष्य-व्वँर्चस्यꣳ सुवीर्यꣳ राय

स्पोषमौद्भिद्यम्। इदꣳ हिरण्यं *जैत्रायाविशतान्माम्।।

उच्चैर्वादि पृतनाजि सत्रासाह- न्धन-ञ्जयम्। सर्वा *समृद्धीरृद्धयो हिरण्ये

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

ऽस्मिन्थ्समाहिताः।।

शुनमहꣳ हिरण्यस्य पितुरिव नामाग्रभैषम्। तंमा हिरण्यवर्चसं पूरुषु प्रियङ्कुरु।।

प्रियं मा देवेषु कुरु प्रियं मा ब्रह्मणे कुरु। प्रियं विश्येषु शूद्रेषु प्रियꣳ राजसु मा कुरु।।

या तिरश्चीनिपद्यसेऽहं विधरणी इति। तान्त्वा घृतस्य धारया यजेसꣳराधनीमहम्।।

सꣳराधन्यै देव्यै स्वाहा प्रसाधन्यै देव्यै स्वाहा।।

सम्राजञ्च विराजञ्चाभिश्रीर्याचनो गृहे।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

लक्ष्मी राष्ट्रस्य या मुखे तया मा सꣳ सृजामसि।।

शुभिके शिर आरोह शोभयन्ती मुखं मम। मुखꣳ हि मम शोभय भूयाꣳसञ्च भगङ्कुरु।।

यामाहरज्जमदग्नि श्श्रद्धायै *कामायान्यै। इमान्तामपिनह्येऽहं भगेन सह वर्चसा।।

यदाञ्जनन्त्रैककुदं जातꣳ हिमवत उपरि। तेन वामाञ्जे तेजसे वर्चसे भगाय च।।

(सꣳराधनीमहन्नव च)।।

इति द्वितीयप्रश्ने अष्टमः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

९ मयिपर्वत पूरुषं मयि पर्वत वर्चसं मयि पर्वत भेषजं मयि पर्वतायुषम्।।

यन्मे वर्चः परागतमात्मानमुपतिष्ठति*। इदन्तत्पुनराददे दीर्घायुत्वाय वर्चसे।।

प्रतिष्ठेस्थो देवतानां मा मा सन्ताप्तम्।।

प्रजापते श्शरणमसि ब्रह्मणश्छदिर्विश्वजनस्य छायाऽसि सर्वतो मा पाहि।।

देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्यामाददे द्विषतो वधायेन्द्रस्य वज्रोऽसि वार्त्रघ्न श्शर्म मे भव यत्पापन्तन्निवारय।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः।।

देवीष्षडुर्वीरित्येषा।। (सम्-४.७.१४)।

[देवीष्षडुर्वीरुरुणः कृणोत विश्वे देवास इह वीरयद्ध्वम्। माहास्महि प्रजया मा तनूभि र्मारधाम द्विषते सोम राजन्]।।

राष्ट्रभृदस्याचार्यासन्दी मात्वद्योषꣳ राष्ट्रभृदसि सम्राडासन्दी मात्वद्योषꣳ राष्ट्रभृदस्यधिपत्न्यासन्दी मात्वद्योषम्।।

आपः पादावनेजनी द्विषन्तन्नाशयन्तु मे। अस्मिन्कुले ब्रह्मवर्चस्यसानि।।

मयि महो मयि यशो मयीन्द्रियꣳवीर्यम्।।

आमागन् यशसा वर्चसा सꣳसृज पयसा तेजसा च। तं मा प्रियं प्रजानाङ्कुर्वधिपतिं

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

पशूनाम्।।

विराजो दोहोऽसि विराजो दोहमशीय मम पद्याय विराज।।

समुद्रव्वः प्रहिणोमि स्वाय्योनिमपिगच्छत। अच्छिद्रः प्रजया भूयासं मा परासेचिमत्पयः।

(असानि षट्च)।।

इति द्वितीयप्रश्ने नवमः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

१० त्रय्यै विद्यायै यशोऽसि यशसो यशोऽसि ब्रह्मणो दीप्तिरसि। तं मा प्रियं प्रजानाङ्-कुर्वधिपतिं पशूनाम्।।

आमागन्नित्येषा।। (पुटम् 2.076)

अमृतोपस्तरणमस्यमृतापिधानमसि।।

यन्मधुनो मध्व्यं परममन्नाद्यं वीर्यम्। तेनाहं मधुनो मध्व्येन परमेणान्नाद्येन वीर्येण परमोऽन्नादो मध्व्योऽसानि।।

गौरस्यपहत पाप्माऽपपाप्मान-ञ्जहि मम चामुष्य च।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

अग्निः प्राश्नातु प्रथमस्सहि वेद यथा हविः। *अरिष्टमस्माकङ्-कृण्वन् ब्राह्मणो ब्राह्मणेभ्यः।।

यज्ञो वर्द्धता-य्यँज्ञस्य वृद्धिमनु वर्द्धाप *चितिरस्यपचितं मा कुर्वपचितोऽहं मनुष्येषु भूयासम्।।

गौर्द्धेनु भव्या माता रुद्राणा-न्दुहिता वसूनाꣳ स्वसाऽऽदित्याना-ममृतस्य नाभिः। प्रणुवोच-ञ्चिकितुषे जनाय मागामनागा-मदिति-व्वँधिष्ट।।

पिबतूदक-न्तृणान्यत्तु। ओमुथ्सृजत।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

भूतम्।। * सा विराट् तन्माक्षायि तस्य तेऽशीय तन्म ऊर्जन्धाः।। ओं कल्पयत।।

(भूयास ँ सप्त च)।।

इति द्वितीयप्रश्ने दशमः खण्डः।।

****

११ धाता ददातु नो रयिमिति चतस्रो यस्त्वा कीरिणेति चतस्रः।।

(३.३.११) [धाता ददातु नो रयिमिशानो जगतस्पतिः। स नः पूर्णेन वावनत्।।

धाता प्रजाया उत राय ईशे धातेद-विँश्व भुवन-ञ्जजान। धाता पुत्र-य्यँजमानाय दाता

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

तस्मा उ हव्यङ्- घृतवद्विधेम।।

धाता ददातु नो रयिं प्राचीञ्जीवातु-मक्षिताम्। वयन्देवस्य धीमहि सुमतिꣳ सत्यराधसः।।

धाता ददातु दाशुषे वसूनि प्रजाकामाय मीढुषे दुरोणे। तस्मै देवा अमृतास्सवँव्ययन्ता-विँश्वे देवासो अदिति स्सजोषाः।।

(१.४.४६)।[यस्त्वा हृदा कीरिणा मन्यमानो ऽमर्त्यं मर्त्यो जोहवीमि। जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम्।।

यस्मै त्वꣳ सुकृते जातवेद उ लोकमग्ने

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

कृणव- स्स्योनम्। अश्विन ँ सपुत्रिण ँवीर-
वन्तङ्-गोमन्त ँ रयिन्नशते स्वस्ति।।

त्वे सुपुत्र शवसोऽवृत्रन् कामकातयः।
न त्वामिन्द्राति रिच्यते।।

उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे
मघवान ँ सुतासः। यदी ँ सबाधः पितरन्न
पुत्रा स्समानदक्षा अवसे हवन्ते]।।

भूर्भुवस्सुवो - राकामह-य्यास्ते राके।।

[राकामह ँ सुहवा ँ सुष्टुती हुवे श्रृणोतु
नस्सुभगा बोधतु त्मना। सीव्यत्वप- स्सूच्या
ऽच्छिद्यमानया ददातु वीर ँ शतदायमुक्थ्यम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

यास्ते राके सुमतय स्सुपेशसो याभि र्ददासि दाशुषे वसूनि। ताभिर्नो अद्य सुमना उपागहि सहस्रपोषꣳसुभगे रराण]।। (३.३.११)

यौगन्धरिरेव नो राजेति साल्वीरवादिषुः। विवृत्तचक्रा आसीनास्तीरेण यमुने तव।।

सोम एव नो राजेत्याहु र्ब्राह्मणीः प्रजाः। विवृत्तचक्रा आसीना स्तीरेणासौ तव।।

पुꣳसुवनमसि।।

आभिष्ट्वाहं दशभिरभिमृशामि दश मास्याय सूतवे।।

यथैव सोमः पवते यथा समुद्र एजति।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized,by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

एवन्ते गर्भ एजतु सह जरायुणा निष्क्रम्य प्रतितिष्ठत्वायुषि ब्रह्मवर्चसि यशसि वीर्येऽन्नाद्ये।।

दशमासाञ्छशयानो धात्रा हि तथाकृतम्। ऐतु गर्भो *अक्षतो जीवो जीवन्त्याः।।

आयमनीर्यमयत गर्भमापो देवीस्सरस्वतीः। ऐतु गर्भो अक्षतो जीवो जीवन्त्याः।।

तिलदेऽवपद्यस्व न माँसमसि नोदलम्। स्थवित्र्यवपद्यस्व न माँसेषु न स्नावसु न बद्धमसि मज्जसु।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

निरैतु पृश्निशेवलꣳ शुने जराय्वत्तवे।।

(अन्नाद्ये सप्त च)।।

इति द्वितीयप्रश्ने एकादशः खण्डः।।

****

१२ दिवस्परीत्येषोऽनुवाकः।।

(सं-४.२.२)। [दिवस्परि प्रथमज्जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः। तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः।।

विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म विभृतं पुरुत्रा। विद्मा ते नाम परमङ्-गुहा यद्विद्मा तमुथ्स-य्यँत आजगन्थ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

समुद्रे त्वा नृमणा अप्स्वन्त र्नृचक्षा ईधे दिवो अग्न ऊधन्। तृतीये त्वा रजसि तस्थिवाꣳसमृतस्य योनौ महिषा अहिन्वन्।।

अक्रन्ददग्नि स्स्तनयन्निव द्यौः क्षामा रेरिह-द्वीरुध स्समञ्जन्। सद्यो जज्ञानो विहीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः।।

उशिक्पावको अरति स्सुमेधा मर्तेष्वग्नि-रमृतो निधायि। इयर्ति धूममरुषं भरिभ्र-दुच्छुक्रेण शोचिषा द्यामिनक्षत्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

विश्वस्य केतु र्भुवनस्य गर्भ आ रोदसी अपृणा-ज्जायमानः। वीडुञ्चिदद्रि- मभिनत् परायञ्जना यदग्निमयजन्त पञ्च।।

श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पण स्सोम गोपाः। वसोस्सूनु स्सहसो अप्सुराजा विभात्यग्र उषसामिधानः।।

यस्ते अद्य कृणवद् भद्रशोचेऽपूपन्देव घृतवन्तमग्ने। प्रतन्नय प्रतरा-व्वस्यो अच्छाभिद्युम्न-न्देवभक्त-य्यविष्ठ।।

आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने। प्रियस्सूर्ये प्रियो अग्ना-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

भवात्युज्जातेन भिनदद्युज्जनित्वैः।।

त्वामग्ने यजमाना अनुद्यून् विश्वा वसूनि दधिरे वार्याणि। त्वया सह द्रविणमिच्छमाना व्रजङ्गोमन्तमुशिजो विवह्रुः।।

दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुश्श्रिये रुचानः। अग्निरमृतो अभवद्वयोभिर्यदेनन्द्यौरजनयथ्सुरेताः]।।

अस्मिन्नहꣳसहस्रं पुष्याम्येधमानस्स्वे वशे।।

अङ्गादङ्गाथ्संभवसि हृदयादधि जायसे। आत्मा वै *पुत्र नामाऽसि सजीव

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

शरदश्शतम्।।

अश्मा भव परशुर्भव हिरण्यमस्तृतं भव।

पशूनान्त्वा हिङ्कारेणाभिजिघ्राम्यसौ।।

मेधान्ते देवस्सविता मेधान्देवी सरस्वती।

मेधान्ते अश्विनौ देवावाधत्तां पुष्करस्रजा।।

त्वयि मेधान्त्वयि प्रजान्त्वय्यग्निस्तेजो दधातु त्वयि मेधान्त्वयि प्रजान्त्वयीन्द्र इन्द्रियन्दधातु त्वयि मेधान्त्वयि प्रजान्त्वयि सूर्यो भ्राजो दधातु।।

क्षेत्रियै त्वा निर्ऋत्यै त्वा द्रुहो मुञ्चामि वरुणस्य पाशात्। अनागसं ब्रह्मणे त्वा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

करोमि शिवे ते द्यावापृथिवी उभे इमे।।

शन्ते अग्नि स्सहाद्भिरस्तु शन्द्यावा-पृथिवी सहौषधीभिः। शमन्तरिक्षꣳ सह वातेन ते शन्ते चतस्रः प्रदिशो भवन्तु।।

या दैवीश्चतस्रः प्रदिशो वातपत्नी-रभि सूर्यो विचष्टे। तासान्त्वा जरस आदधामि प्रयक्ष्म एतु निर्ऋतिं पराचैः।।

अमोचि यक्ष्मा-द्दुरितादवर्त्यै द्रुहः पाशा-न्निर्ऋत्यै चोदमोचि। अहा अवर्ति- मविद-थ्स्योन-मप्यभूद्भद्रे सुकृतस्य लोके।।

सूर्यमृत-न्तमसो ग्राह्या यद्देवा अमुञ्चन्न-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

सृजन्व्येनसः। एवमहमिमङ्क्षेत्रियाज्जामिशंसाद्द्रुहो मुञ्चामि वरुणस्य पाशात्।।

भूस्स्वाहा भुवस्स्वाहा सुवस्स्वाहोँस्वाहा।

(पाशादोँस्वाहा)।।

इति द्वितीयप्रश्ने द्वादशः खण्डः।।

****

१३ माते कुमारँ रक्षो वधीन्मा धेनुरत्यासारिणी। प्रियाधनस्य भूया एधमाना स्वे गृहे।।

अयङ्कुमारो जरान्धयतु दीर्घमायुः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

यस्मै त्वꣳस्तन प्रप्यायायु र्वर्चो यशो बलम्।

यद्भूमेर् हृदयन्दिवि चन्द्रमसि श्रितम्।

तदुर्विपश्यं माऽहं पौत्रमघꣳरुदम्।।

यत्ते सुसीमे हृदय- व्वेदाह- न्तत्प्रजापतौ।

वेदाम तस्य ते वयं माऽहं पौत्रमघꣳ रुदम्।।

नामयति न रुदति यत्र वय-व्वदामसि

यत्र चाभिमृशामसि।।

आपस्सुप्तेषु जाग्रत रक्षाꣳसि

निरितोनुदद्ध्वम्।।

अयङ्कलिं पतयन्तꣳश्वानमिवोद्धृद्धम्।

अजा-व्वाशितामिव मरुतः पर्यादध्वꣳ स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

शण्डेरथ श्शण्डिकेर उलूखलः। च्यवनो नश्यतादित स्स्वाहा।।

अयश्शण्डो मर्क उपवीर उलूखलः। च्यवनो नश्यतादित स्स्वाहा।।

केशिनी- श्श्वलोमिनीः खजापो- ऽजोपकाशिनीः। अपेत नश्यतादित- स्स्वाहा।।

मिश्रवाससः कौबेरका रक्षोराजेन प्रेषिताः। ग्राम ँ सजानयो गच्छन्तीच्छन्तो- ऽपरिदाकृतान्थ्स्वाहा।।

एतान् घ्नतैतान् गृह्णीतेत्ययं ब्रह्मणस्पुत्रः। तानग्निः पर्यसरत्ता- निन्द्र- स्तान्बृहस्पतिः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

तान्हव्वेद ब्राह्मणः प्रमृशतः कूटदन्तान् विकेशान् लम्बन स्तनान्थ्स्वाहा।।

(निरितोनुदद्ध्वꣳ स्वाहा त्रीणि च)।।

इति द्वितीयप्रश्ने त्रयोदशः खण्डः।।

****

१४ नक्तञ्चारिण उरस्पेशाञ्छूलहस्तान्कपालपान्। पूर्व एषां पितेत्युच्चैश्श्राव्यकर्णकः। माता जघन्या सर्पति ग्रामे विधुरमिच्छन्ती स्वाहा।।

निशीथचारिणी स्वसा सन्धिना प्रेक्षते कुलम्। या स्वपन्तं बोधयति यस्यै विजातायां

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

मनः। तासान्त्वं कृष्णवर्त्मने क्लोमानꣳ हृदय-य्यँकृत्। अग्ने अक्षीणि निर्दह स्वाहा।।

अङ्गादङ्गा- थ्संभवसि हृदयादधि जायसे। वेदो वै *पुत्र नामाऽसि सजीव शरदश्शतम्।।

अश्मा भवेत्येषा।। (पुटम् 2.088)

अग्निरायुष्मानिति पञ्च।। (सं-२.३.१०)।।

[अग्निरायुष्मान्थ्स वनस्पतिभि- रायुष्मान्तेन त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि।।

सोम आयुष्मान्थ्स ओषधीभि- रायुष्मान् तेन त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

यज्ञ आयुष्मान्थ्स दक्षिणाभि- रायुष्मा-

न्तेन त्वाऽऽयुषाऽऽयुष्मन्तङ्- करोमि।।

ब्रह्मायुष्मत्तद् ब्राह्मणै- रायुष्म-त्तेन त्वाऽऽ

युषाऽऽयुष्मन्तङ्- करोमि।।

देवा आयुष्मन्त- स्तेऽमृतेनायुष्मन्त-

स्तेन त्वाऽऽयुषाऽऽयुष्मन्तङ्- करोमि]।।

सर्वस्मादात्मन स्संभूताऽसि सा जीव

शरद श्शतम्।।

भूरपान्तौषधीनाꣳ रसं प्राशयामि

शिवास्त आप ओषधय- स्सन्त्वनमीवास्त

आप ओषधय- स्सन्त्वसौ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

भुवोऽपाꣳ सुवरपां भूर्भुवस्सुवरपा-न्त्वौषधीनाꣳ रसं प्राशयामि शिवास्त आप ओषधय- स्सन्त्वनमीवास्त आप औषधय-स्सन्त्वसौ।।

उष्णेन वायवुदकेनेत्येषः।। (पुटम् 2.051)

(एषा पञ्च च)।।

इति द्वितीयप्रश्ने चतुर्दशः खण्डः।।

****

१५ यद्भूमेः क्रूरन्तदितो हरामि पराचीन्निर्ऋति-न्निर्वाहयामि। इदꣳ श्रेयो ऽवसानमागन्म देवा गोमदश्वावदिदमस्तु प्रभूम।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

स्योना पृथिवि भवा नृक्षरा निवेशनी। यच्छा न शर्म सप्रथाः।।

इहैव तिष्ठ निमिता तिल्वला स्यादिरावती। मद्ध्ये ताल्प्यस्य तिष्ठान्मा त्वा प्रापन्नघायवः।।

आत्वा कुमार स्तरुण आवथ्सो जगता सह। आत्वा परिस्रुतः कुम्भा आददध्नः कलशीरयन्।।

ऋतेन स्थूणावधिरोहवंशोग्रो विराजन्नपसेध शत्रून्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

ब्रह्मच ते क्षत्रञ्च पूर्वेस्थूणे अभिरक्षतु।।

यज्ञश्च दक्षिणाश्च दक्षिणे।।

इषश्चोर्जश्चापरे।।

मित्रश्च वरुणश्चोत्तरे।।

धर्मस्ते स्थूणाराजश्श्री स्ते स्तूपः।।

उद्धियमाण उद्धर पाप्मनो मा यदविद्वान्

यच्च विद्वाꣳ श्चकार। अह्ना यदेनः

कृतमस्ति पापꣳ रात्र्या यदेनः कृतमस्ति

पापꣳ सर्वस्मान्मोद्धृतो मुञ्च तस्मात्।।

इन्द्रस्य गृहा वसुमन्तो वरूथिन स्तानहꣳ

सुमनसः प्रपद्ये।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

अमृताहुति- ममृतांया- ञ्जुहोम्यग्निं पृथिव्या- ममृतस्य जित्यै। तयाऽनन्तङ्- काममह- ञ्जयानि प्रजापति र्यं प्रथमो जिगायाग्निमग्नौ स्वाहा।।

अन्नपत इत्येषा।। (सं-४.२.३)।।

[अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः। प्रप्रदातारन्तारिष ऊर्जन्नो धेहि द्विपदे चतुष्पदे]

अरिष्टा अस्माक - व्वीरा स्सन्तु मा परासेचि मे धनम्।।

भूमि र्भूमिमगान्माता मातरमप्यगात्। भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि सभिद्यताम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

वास्तोष्पत॒ इति॒ द्वे।। (सं-३.४.१०)।।

[वास्तोष्पते॒ प्रतिजानीह्यस्मान्- थ्स्वावे॒शो अनमी॒वो भवानः। यत्त्वेमहे॒ प्रति॒ तन्नो जुषस्व॒ शन्न एधि द्वि॒पदे॒ शञ्चतु॒ष्पदे।।

वास्तोष्पते शग्मया स॒ꣳसदा॑ ते सक्षी॒महि॑ र॒ण्वया॑ गातु॒मत्या॑। आवः॒ क्षेम॑ उ॒त योगे॒ वरन्नो यू॒यं पा॑त स्व॒स्तिभि॒ स्सदा॑ नः]।।

वास्तोष्पते प्र॒तर॑णो न एधि॒ गोभि॒रश्वे॑भि रिन्दो। अ॒जरा॑सस्ते स॒ख्ये स्या॑म पि॒तेव॑ पु॒त्रान् प्रति॑नो जुषस्व।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

अमीवहा वास्तोष्पते विश्वारूपाण्या-
विशन्। सखा सुशेव एधिनः। शिवꣳशिवम्।

(अभिरक्षत्वेषा नव च)।।

इति द्वितीयप्रश्ने पञ्चदशः खण्डः।।

****

१६ कूर्कुर स्सुकूर्कुरः कूर्कुरो वाल-
बन्धनः। उपरिष्टा- द्यदेजाय तृतीयस्या इतो
दिवः।।

औलब इत्तमुपाह्वयथा- र्जीञ्छ्याम-
श्शबलः। अधोराम उलुंबल स्सारमेयो ह
धावति समुद्रमवचाकशत्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

बिभ्रन्निष्कञ्च रुक्मञ्च शुनामग्रꣳ सुबीरिणः। सुबीरिणसृज सृज शुनकसृजैकव्रात्यसृजच्छत्।।

तथ्सत्यं यत्त्वेन्द्रोऽब्रवीद्गा स्स्पाशयस्वेति *तास्त्वꣳस्पाशयित्वा-ऽऽगच्छस्तन्त्वा ऽब्रवीदविदहा(३)इत्यविदꣳ हीति वरंव्वृणीष्वेति कुमारमेवाह व्वरंव्वृण इत्यब्रवीः*।।

विगृह्य बाहू प्लवसे द्यामवचाकशत्।।

बिभ्रन्निष्कञ्च रुक्मञ्च शुनामग्रꣳ सुबीरिणः। सुबीरिणसृज सृज शुनकसृजैकव्रात्य-सृजच्छत्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

तथ्सत्यं यत्ते सरमा माता लोहितः पिता। अमी एके सरस्यका अवधावत तृतीयस्या इतो दिवः।।

तेकश्च ससरमतण्डश्च तूलश्च वितूलश्चार्जुनश्च लोहितश्च। दुला ह नाम वो माता मन्थाकको ह वः पिता।।

सन्तक्षा हन्ति चक्री वो नसीसरीदत। छदपेहि सीसरम सारमेय नमस्ते अस्तु सीसर।।

*समश्वा वृषणः पदो नसीसरीदत। छदपेहि सीसरम सारमेय नमस्ते अस्तु

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

सीसर। श्वानमिच्छ्वा ऽदन्न पुरुषञ्छत्।।

एते ते प्रतिदृश्येते समानवसने उभे। ते अहꣳ सारयेण मुसलेनावहन्म्युलूखले।।

हतश्शङ्खो हतश्शङ्खपिता हतश्शङ्ख कुतुर्वकः। अप्येषाꣳ स्थपतिर्हतः।।

ऋषिर्बोधः प्रबोध स्स्वप्नो मातरिश्वा। ते ते प्राणान् थ्स्परिष्यन्ति माभैषी र्न मरिष्यसि।।

जग्धो मशको जग्धावितृष्टि र्जग्धो व्यद्ध्वर स्स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

जग्धो व्यद्ध्वरो जग्धो मशको जग्धा वितृष्टि स्स्वाहा।।

जग्धा वितृष्टि र्जग्धो व्यद्ध्वरो जग्धो मशक स्स्वाहा।।

(सृजच्छदुभे अष्टौ च)।।

इति द्वितीयप्रश्ने षोडशः खण्डः।।

****

१७ इन्द्र जहि दन्दशूकं पक्षिणं यस्सरीसृपः। दंक्ष्यन्तञ्च दशन्तञ्च सर्वाँ स्तानिन्द्र जंभय स्वाहा।।

अफ्सुजात सरेवृद्धदेवाना- मपिहस्त्य।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

त्वमग्न इन्द्र प्रेषित स्सनो मा हिꣳसी स्स्वाहा।।

त्राणमसि परित्राणमसि परिधिरसि। अन्नेन मनुष्याꣳस्त्रायसे तृणैः *पशून्गर्तेन सर्पान् यज्ञेन देवान् थ्स्वधया पितृन् थ्स्वाहा।।

तथ्सत्यं यत्ते ऽमावास्यायाञ्च *पौर्णमास्याञ्च विषबलिꣳ हरन्ति सर्व उदर सर्पिणः। तत्ते प्रेरते त्वयि सव्विँशन्ति त्वयि नस्सतस्त्वयि सद्भ्यो वर्षाभ्यो नःपरिदेहि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

नमो अस्तु सर्पेभ्य इति तिस्रः।।

[नमो अस्तु सर्पेभ्यो येकेच पृथिवीमनु। ये अन्तरिक्षे येदिवि तेभ्यस्सर्पेभ्यो नमः।।

येऽदो रोचने दिवो येवा सूर्यस्य रश्मिषु। येषामप्सुसदः कृतन्तेभ्य स्सर्पेभ्यो नमः।।

या इषवो यतुधानाना- य्येवा वनस्पतीँरनु। येवाऽवटेषु शेरते तेभ्य स्सर्पेभ्यो नमः]।। (सं- ४.२.८)।।

नमो अस्तु सर्पेभ्यो ये पार्थिवाय आन्तरिक्ष्या ये दिव्या ये दिश्याः। तेभ्य इमं बलिँ हरिष्यामि तेभ्य इमं बलिमहारषम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

तक्षक वैशालेय धृतराष्ट्रैरावतस्ते जीवास्त्वयि नस्सत-स्त्वयि सद्भ्यो वरूषाभ्यो नः परिदेहि।।

धृतराष्ट्रैरावत *तक्षकस्ते वैशालेयो जीवास्त्वयि नस्सतस्त्वयि सद्भ्यो वरूषाभ्यो नः परिदेहि।।

अहिꣳसातिबलस्ते जीवास्त्वयि नस्सत-स्त्वयि सद्भ्यो वरूषाभ्यो नः परिदेहि।।

अतिबलाहिꣳसस्ते जीवास्त्वयि नस्सतस्त्वयि सद्भ्यो वरूषाभ्यो नः परिदेहि।

ये दन्दशूकाः पार्थिवास्ताꣳ स्त्वमितः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

परो गव्यूति- न्निवेशय। सन्ति वैनश्शफिन-स्सन्ति दण्डिनस्ते वो नेद्धिनसान्न्येद्यूयमस्मान् हिनसात।।

समीची नामासि प्राचीदिग्घेतयो नामस्थेति द्वादश पर्यायाः।। (सं-५.५.१०)।

[समीची नामासि प्राचीदिक्तस्यास्तेऽग्नि-रधिपतिरसितो रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्यान्नमस्तौ नो मृडयतान्ते यन्द्विष्मो यश्च नो द्वेष्टि तव्वाञ्जंभे दधामि।।

ओजस्विनी नामासि दक्षिणा दिक्तस्यास्त इन्द्रोऽधिपतिः पृदाकू रक्षिता ००० दधामि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

प्राची नामासि प्रतीची दिक्तस्यास्ते सोमो ऽधिपतिस्स्वजो रक्षिता ०००० दधामि।।

अवस्थावा नामास्युदीची दिक्तस्यास्ते वरुणो- ऽधिपति स्तिरश्चराजी रक्षिता ०००० दधामि।।

अधिपत्नी नामासि बृहती दिक्तस्यास्ते बृहस्पतिरधिपति श्श्वित्रो रक्षिता०००दधामि।

वशिनी नामासीय- न्दिक्तस्यास्ते यमो ऽधिपतिः कल्माषग्रीवो रक्षिता०००दधामि]।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

[हेतयो नामस्थ तेषाव्वः पुरो गृहा अग्निर्व इषव- स्सलिलो वातनामन्तेभ्यो वो नमस्ते नो मृडयत ते यन्द्विष्मो यश्च नो द्वेष्टि तव्वो जंभे दधामि।।

निलिंपा नामस्थ तेषाव्वो दक्षिणा गृहाः पितरो व इषवस्सगरो वातनामं ०००दधामि।

वज्रिणो नामस्थ तेषाव्वः पश्चाद्गृहा-स्स्वप्नोव इषवो गह्वरो वातनामं०००दधामि

अवस्थावानो नामस्थ तेषाव्व उत्तराद्गृहा आपो व इषवस्समुद्रो वातनामं ०० दधामि।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

अधिपतयो नामस्थ तेषाँव्व उपरिगृहा वरूषव्व इषवोऽवस्वान् वातनामं ०० दधामि।

क्रव्या नामस्थ पार्थिवास्तेषाँव्व इह गृहा अन्नव्व इषवो निमिषो वातनामं ०० दधामि]

अपश्वेतपदा जहि पूर्वेण चापरेण च।

सप्त च मानुषीरिमा स्तिस्रश्च राजबन्धवीः।

नवै श्वेतस्याद्ध्याचारेऽहिर्जघान कञ्चन।

श्वेताय वैदर्वाय नमो नमश्श्वेताय वैदर्वाय।।

(दिश्या राजबन्धवी द्वे च)।।

इति द्वितीयप्रश्ने सप्तदशः खण्डः।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

१८ परमेष्ठ्यसि परमां माᳬ श्रियङ्गमय।।

प्रत्यवरूढो नो हेमन्तः।।

प्रतिक्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु। प्रति प्रजायां प्रति तिष्ठामि भव्ये।।

इहधृतिरिह विधृतिरिह रन्तिरिह रमतिः।।

स्योना पृथिवि बडित्था पर्वतानामिति द्वे।

[बडित्था पर्वतानाङ्-खिद्रं बिभर्षि पृथिवि।

प्रयाभूमि प्रवत्वति- मह्ना जिनोषिमहिनि]।।

(सं-२.२.१२)।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

आत्वावहन्तु हरय- स्सचेतस- श्श्वेतैरश्वै- स्सह केतुमद्भिः। *वाताजिरै र्मम हव्याय शर्व।।

उपस्पृशतु मीढ्वान्मीढुषे स्वाहोपस्पृशतु मीढुषी मीढुष्यै स्वाहा।।

जयन्तोपस्पृश जयन्ताय स्वाहा।।

भवाय देवाय स्वाहा शर्वाय देवाय स्वाहेशानाय देवाय स्वाहा पशुपतये देवाय स्वाहा रुद्राय देवाय स्वाहोग्राय देवाय स्वाहा भीमाय देवाय स्वाहा महते देवाय स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

भवस्य देवस्य पत्न्यै स्वाहा शर्वस्य देवस्य पत्न्यै स्वाहेशानस्य देवस्य पत्न्यै स्वाहा पशुपते देवस्य पत्न्यै स्वाहा रुद्रस्य देवस्य पत्न्यै स्वाहोग्रस्य देवस्य पत्न्यै स्वाहा भीमस्य देवस्य पत्न्यै स्वाहा महतो देवस्य पत्न्यै स्वाहा।।

जयन्ताय स्वाहा।।

अग्नये स्विष्टकृते सुहुतहुत आहुतीनाङ्कामानाꣳ समर्द्धयित्रे स्वाहा।।

स्वस्ति नः पूर्णमुखः परिक्रामतु।।

गृहपोपस्पृश गृहपाय स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

गृहप्युपस्पृश गृहप्यै स्वाहा।।

घोषिण उपस्पृशत घोषिभ्य स्स्वाहा।।

श्वासिन उपस्पृशत श्वासिभ्य स्स्वाहा।।

विचिन्वन्त उपस्पृशत विचिन्वद्भ्य स्स्वाहा।।

प्रपुन्वन्त उपस्पृशत प्रपुन्वद्भ्य स्स्वाहा।

*समश्नन्त उपस्पृशत समश्नद्भ्य स्स्वाहा।।

*देवसेना उपस्पृशत देवसेनाभ्य स्स्वाहा।।

या आख्याता याश्चानाख्याता *देवसेना उपस्पृशत देवसेनाभ्य स्स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

द्वारापोपस्पृश द्वारापाय स्वाहा।।

द्वाराप्युपस्पृश द्वाराप्यै स्वाहा।।

अन्वासारिण उपस्पृशतान्वासारिभ्यस्स्वाहा।।

* निषङ्गिन्नुपस्पृश निषङ्गिणे स्वाहा।।

नमो निषङ्गिण इषुधिमते *क्षेत्रस्य पतिना वयमिति द्वे।।

[क्षेत्रस्य पतिना वय७ हितेनेव जयामसि। गामश्वं पोषयित्न्वा सनो मृडातीदृशे।।

क्षेत्रस्य पते मधुमन्तमूर्मि-न्धेनुरिव पयो अस्मासु धुक्ष्व। मधुश्चुतं घृतमिव सुपूत-मृतस्य नः पतयो मृडयन्तु]।। (सं-१.१.१४)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

(जयन्ताय स्वाहा विचिन्वद्भ्य स्स्वाहा नव च)।।

इति द्वितीयप्रश्ने अष्टादशः खण्डः।।

****

१९ यन्मे माता प्रलुलोभ चरत्यननुव्रता। तन्मे रेतःपिता *वृङ्क्तामाभुरन्योऽवपद्यताममुष्मै स्वाहा।।

यास्तिष्ठन्ति या धावन्ति या आर्द्रोघ्नीः *परितस्थुषीः। अद्भि र्विश्वस्य भर्त्रीभिरन्तरन्यं पितुर्दधेऽमुष्मै स्वाहा।।

यन्मे पितामही प्रलुलोभ चरत्यननुव्रता। तन्मे रेतः पितामहो वृङ्क्तामाभुरन्यो

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

ऽवपद्यताम्मुष्मै स्वाहा।।

अन्तर्दधे पर्वतैरन्तर्मह्या पृथिव्या। आभि-

र्दिग्भिरनन्ताभि-रन्तरन्यं पितामहाद्दधे ऽमुष्मै

स्वाहा।।

यन्मे प्रपितामही प्रलुलोभ चरत्यननुव्रता।

तन्मे रेतः प्रपितामहो *वृङ्क्तामाभुरन्यो

ऽवपद्यताम्मुष्मै स्वाहा।।

अन्तर्दध *ऋतुभिरहोरात्रैश्च सन्धिभिः।

अर्द्धमासैश्च मासैश्चान्तरन्यं प्रपितामहाद्दधे

ऽमुष्मै स्वाहा।।

ये चेह पितरो ये च नेह याꣳश्च विद्म

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

याᳬ उचन प्रविद्म। अग्ने तान् वेत्थ यदिते जातवेद-स्तया प्रत्तᳬस्वधया *मदन्तु स्वाहा।

स्वाहा पित्रे पित्रे स्वाहा स्वाहा पित्रे पित्रे स्वाहा।।

स्वधा स्वाहाऽग्नये कव्यवाहनाय स्वधा स्वाहा।।

एष ते तत मधुमाᳬ ऊर्मिस्सरस्वान् यावानग्निश्च पृथिवी च तावत्यस्य मात्रा तावतीन्त एतां मात्रा-न्ददामि यथाऽग्निरक्षितो ऽनुपदस्त एवं मह्यं पित्रोऽक्षितो ऽनुपदस्त-स्स्वधा भवतान्त्वᳬस्वधा-न्तैस्सहोपजीवर्चस्ते

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

महिमैष ते पितामह मधुमाᳬ ऊर्मि स्सरस्वान् यावान् वायुश्चान्तरिक्षञ्च तावत्यस्य मात्रा तावतीन्त एतां मात्रा-न्ददामि यथा वायुरक्षितोऽनुपदस्त एवं मह्यं पितामहायाक्षितोऽनुपदस्त स्स्वधा भवता-न्त्वᳬस्वधा-न्तैस्सहोपजीव सामानि ते महिमैष ते प्रपितामह मधुमाᳬ ऊर्मि-स्सरस्वान् यावानादित्यश्च द्यौश्च तावत्यस्य मात्रा तावतीन्त एतां मात्रा-न्ददामि यथा- ऽऽदित्योऽक्षितोऽनुपदस्त एवं मह्यं प्रपितामहायाक्षितो ऽनुपदस्त-स्स्वधा भवता-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

न्त्वꣳ स्वधान्तै- स्सहोपजीव यजूꣳषि ते महिमा।।

(अमुष्मै स्वाहा सप्त च)।।

इति द्वितीयप्रश्ने एकोनविंशः खण्डः।।

****

२० पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानान्त्वा प्राणापानयो- र्जुहोम्यक्षितमसि मैषां क्षेष्ठा अमुत्रामुष्मिन्लोके।।

*मार्जयन्तां मम पितरो मार्जयन्तां मम पितामहा मार्जयन्तां मम प्रपितामहाः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

मार्जयन्तां मम मातरो मार्जयन्तां मम पितामह्यो मार्जयन्तां मम प्रपितामह्यः।।

एतत्ते ततासौ ये च त्वामन्वेतत्ते पितामहासौ ये च त्वामन्वेतत्ते प्रपितामहासौ येचत्वामनु।।

एतत्ते मातरसौ याश्चत्वामन्वेतत्ते पितामह्यसौ याश्चत्वामन्वेत्ते प्रपितामह्यसौ याश्चत्वामनु।।

मार्जयन्तां मम पितर इत्येते।।

येच वोऽत्र येचास्मास्वाशंसन्ते याश्च वोऽत्र याश्चास्मास्वाशंसन्ते ते च वहन्तां

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

ताश्च वहन्तां तृप्यन्तु भवन्त स्तृप्यन्तु भवत्य *स्तृप्यत तृप्यत तृप्यत।।

पुत्रान्पौत्रानभि तर्पयन्तीरापो मधुमतीरिमाः। स्वधां पितृभ्यो अमृत-न्दुहाना आपो देवीरुभयाꣳस्तर्पयन्तु।।

*तृप्यत तृप्यत तृप्यत।।

प्राणे निविष्टोऽमृतञ्जुहोमि ब्रह्मणि म आत्माऽमृतत्वाय।।

याञ्जनाः प्रतिनन्दन्ति रात्रि-न्धेनुमिवायतीम्। सव्वत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

वहवपा-ज्जातवेदः पितृभ्यो *यत्रैनान् वेत्थ निहितान्पराके। मेदसः कूल्या उप तान्क्षरन्तु *सत्या एषामाशिषस्सन्तु कामैस्स्वाहा।।

याज्जनाः प्रतिनन्दन्तीत्येषा।। (पुटम् 2.124)

इयमेव सा या प्रथमा व्यौच्छदिति तिस्रः।। (सम्- ४.३.११)।।

[इयमेव सा या प्रथमा व्यौच्छदन्तरस्याञ्चरति प्रविष्टा। वधूर्जजान नवगज्जनित्री त्रय एनां महिमानस्सचन्ते।।

छन्दस्वती उषसा पेपिशाने समान-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

य्योनिमनु सञ्चरन्ती। सूर्यपत्नी विचरतः प्रजानती केतुङ्-कृण्वाने अजरे भूरिरेतसा।।

ऋतस्य पन्थामनु तिस्र आगुस्त्रयो घर्मासो अनु ज्योतिषाऽऽगुः। प्रजामेका रक्षत्यूर्जमेका व्रतमेका रक्षति देवयूनाम्]।।

एकाष्टकां पश्यत दोहमानामन्नं माᳬसवद्- घृतव-थ्स्वधावत्। तद्ब्राह्मणै-रति पूत- मनन्तमक्षय्य- ममुष्मि- ल्लँलोके स्फीतिङ्-गच्छतु मे पितृभ्य स्स्वाहा।।

औलूखलाग्रावाणो घोषमक्रत हविः कृण्वन्तः परिवथ्सरीणम्। एकाष्टके सुप्रजा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

वीरवन्तो वयꣳस्याम पतयो रयीणाम्।।

एकाष्टका तपसा तप्यमाना सव्वँत्सरस्य पत्नी दुदुहे प्रपीना। तन्दोहमुपजीवाथ पितरस्सहस्रधार-ममुष्मि- ल्लँलोके स्वाहा।।

(तृप्यत परिवत्सरीणं त्रीणि च)।।

इति द्वितीयप्रश्ने विंशः खण्डः।।

****

२१ उक्थ्यश्चास्यतिरात्रश्च साद्यस्क्री-श्छन्दसा सह। अपूपघृताहुते नमस्ते अस्तु माꣳस पिप्पले स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

भूः पृथिव्यग्निनर्चामुं मयि कामन्नियुनज्मि स्वाहा।।

भुवो वायुनाऽन्तरिक्षेण साम्नाऽमुं मयि कामन्नियुनज्मि स्वाहा।।

स्वर्दिवाऽऽदित्येन यजुषाऽमुं मयि कामन्नियुनज्मि स्वाहा।।

जनदद्भि- रथर्वाङ्गिरोभि- रमुं मयि काम- न्नियुनज्मि स्वाहा।।

रोचनायाजिरायाग्नये देवजातवे स्वाहा।।

केतवे मनवे ब्रह्मणे देवजातवे स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

स्वधा स्वाहाऽग्नये कव्यवाहनाय स्वधा स्वाहा।।

अन्नमिव ते दृशे भूयासं वस्त्रमिव ते दृशे भूयासं वित्तमिव ते दृशे भूयासमाशेव ते दृशे भूयासꣳ श्रद्धेव ते दृशे भूयासम्।।

सꣳस्रवन्तु दिशो महीस्समा धावन्तु सूनृताः। सर्वे कामा अभियन्तु माप्रिया अभिरक्षन्तु माप्रियाः।।

यशोऽसि यशोऽहं त्वयि भूयासमसौ।।

*अङ्कौ न्यङ्कावभित इत्येषा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

[अङ्कौ न्यङ्कावभितो रथय्यौध्वान्तव्वातग्रमनु- सञ्चरन्तौ दूरेहेति- रिन्द्रियावान् पतत्री ते नोऽग्नयः पप्रयः पारयन्तु]।।

(सम्-१.७.७)।।

अद्ध्वनामद्ध्वपते स्वस्ति मा संपारय।।

अयव्वामश्विनौ रथो मा दुःखे मा सुखे रिषत्। अरिष्ट स्स्वस्ति गच्छतु विविघ्नन्पृतनायतः।।

अश्वोऽसि हयोऽस्यत्योऽसि नरोऽस्यर्वाऽसि सप्तिरसि वाज्यसि वृषाऽसि नृमणा असि ययुर्नामास्यादित्यानां पत्वाऽन्विहि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

हस्तियशसमसि हस्तियशसी भूयासं वह काल वह श्रियं माऽभिवह। इन्द्रस्य त्वा वज्रेणाभि निदधाम्यसौ।।

अवजिह्वक निजिह्वकाव त्वा हविषा यजे। तथ्सत्यं यदहं ब्रवीम्यधरोमदसौ वदाथ्स्वाहा।।

आते वाचमास्यां दद आमनस्याꣳ हृदयादधि। यत्र यत्र ते वाङ्निहिता तान्त आददे। तथ्सत्यं यदहं ब्रवीम्यधरो मत्पद्यस्वासौ।। (भूयासमसौ पञ्च च)।।

इति द्वितीयप्रश्ने एकविंशः खण्डः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

****

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

२२ यात एषा रराट्या तनूर्मन्योर्मृद्ध्रस्य नाशिनी। तान्देवा ब्रह्मचारिणो विनयन्तु सुमेधसः।।

यत्त एतन्मुखेऽमत ॐ *रराटमुदिव विद्ध्यति। विते क्रोधन्नयामसि गर्भमश्वतर्या इव।।

अवज्यामिव धन्वनो हृदो मन्युन्तनोमि ते। इन्द्रापास्य फलिगमन्येभ्यः पुरुषेभ्योऽन्यक्रमत्।।

*यदहन्धनेन प्रपणॐश्चरामि *धनेन देवा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

धनमिच्छमानः। तस्मिन्थ्सोमो रुचमादधा-

त्वग्निरिन्द्रो बृहस्पतिश्च स्वाहा।।

परित्वा गिरेरमिहं परिभ्रातुः परिष्वसुः।

*परि सर्वेभ्यो ज्ञातिभ्यः परिषीतः क्वेष्यसि।।

शश्वत्परि कुपितेन सङ्क्रामेणाविच्छिदा।

उलेन परिषीतोऽसि परिषीतोऽस्युलेन।।

आवर्तन वर्तयेत्येषा।।

[आवर्तन वर्तय निवर्तन वर्तयेन्द्र नर्दबुद।

भूम्याश्चतस्रः प्रदिशस्ताभिरावर्तया पुनः]।।

आवर्तने निवर्तन आवर्तन निवर्तनाय

स्वाहा।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

अनुपोऽह्वदनुह्वयो निवर्तोवोन्यवीवृतत्।
ऐन्द्रः परिक्रोशो वः परिक्रोशतु सर्वतः।।

यदिमामतिमन्याद्ध्वा अदेवादेववत्तरम्*।
इन्द्रः पाशेन *सिक्त्वा वो मह्यमिद्वशमानया-
थ्स्वाहा।।

यदि वृक्षाद्यद्यन्तरिक्षा-त्फल-मभ्यपतत्तदु
वायुरेव*। यत्रास्पृक्षत्तनुवं यत्र वास आपो
बाधन्तां निर्ऋतिं पराचैः।।

ये पक्षिणः पतयन्ति बिभ्यतो
निर्ऋतैस्सह। ते मा शिवेन शग्मेन

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

तेजसोन्दन्तु वर्चसा।।

दिवोनु मा बृहतो अन्तरिक्षादपाꣳ स्तोकों

*अभ्यपतच्छिवेन। समहमिन्द्रियेण *मनसा

समागां ब्रह्मणा संपृञ्चान स्सुकृता कृतेन।।

इमंमेवरुण तत्त्वायामि त्वन्नोअग्ने

सत्त्वन्नोअग्ने त्वमग्नेअयासि प्रजापते।। (पु. 1.020)

सम्राजञ्च व्याहृती विहृताः। (पुटम् 2.072)

इमञ्जीवेभ्यः परिधि- न्दधामि मैषां

नुगादपरो अर्द्धमेतम्। शतञ्जीवन्तु शरदः

पुरूची- स्तिरो मृत्युं दधतां पर्वतेन।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

(क्वेष्यसि पराचैरष्टौ च)।।

इति द्वितीयप्रश्ने द्वाविंशः खण्डः।।

****

[उष्णेन पञ्चदशायुर्दा द्वाविꣳशतिरागन्त्रा द्वादश योगेयोगे चतुर्दश सुश्रवस्सुश्रवसन्नव परित्वैकविꣳशतिरिमꣳस्तोम- मायुष्य- मेकान्नविꣳशति- रेकान्नविꣳशतिर्मयि षोडश त्रय्यै विद्यायै धाता ददातु नस्सप्तदश सप्तदश दिवस्परीति विꣳशति र्माते कुमारन्त्रयोविꣳशति र्नक्तञ्चारिणः पञ्चदश यद्भूमेरेकान्नत्रिꣳशत् कूर्कुरोऽष्टाविꣳशति- रिन्द्र जहि द्वाविꣳशतिः परमेष्ठ्यसि परमामेकान्नत्रिꣳशद्यन्मे माता सप्तदश पृथिवीते त्रयोविꣳशतिरुक्थ्यश्च पञ्चविꣳशति

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। एकाग्निकाण्डे द्वितीयः प्रश्नः ।।

र्यात एषाष्टाविꣳशति द्वाविꣳशतिः]।। [२२]।।

[उष्णेन धातोक्थ्यश्च द्वाविꣳशतिः]।।

उष्णेन दधतां पर्वतेन।।

हरिः ओ(३)म्।।

इत्येकाग्निकाण्डे द्वितीयः प्रश्नः

एकाग्निकाण्डश्च समाप्तः।।

* * * * * * *

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.